




[illegible]

[illegible]

[illegible]

[illegible] मम द्रयामि नमः [illegible] मम द्रयामि

नमः [illegible] मम [illegible] नमः [illegible] मम द्रयामि

[illegible] मम द्रयामि नमः [illegible] मम द्रया

ॐ ॐ ॐ [illegible]

मि ०: ०: [illegible] नमः ॐ ॐ ॐ [illegible]

𑆩𑆚𑇀𑆠𑇀𑆫𑆂

𑆍𑆀 𑆲𑇀𑆫𑆵𑆁 𑆱𑇀𑆫𑆵𑆁 𑆑𑇀𑆬𑆵𑆁 𑆑𑇀𑆫𑆶𑆁 𑆑𑇀𑆫𑆶𑆁 𑆮𑆂 [illegible] 𑆮𑆂 𑆑𑇀𑆫𑆶𑆁 𑆑𑇀𑆫𑆶𑆁 𑆑𑇀𑆬𑆵𑆁 𑆱𑇀𑆫𑆵𑆁 𑆲𑇀𑆫𑆵𑆁 𑆍𑆀


𑆍𑆀 [illegible]

𑆮𑆴[illegible]

अथ गायत्रीपञ्चाङ्गं प्रारम्भः ।

अथ गायत्रीपंचांगस्थविषयानुक्रमः




ॐ सत्यशिरसि
सांख्यायनगोत्रम्
ॐ भूर्भुवःस्वः परमात्मा.
ब्रह्म
ॐ तपः
ॐ अग्निः
ॐ जनः
ॐ भूः पादयोः
ॐ भुवः
विष्णुः
ॐ ऐं ह्रीं श्रीं क्लीं
ॐ महः नाभौ.
ॐ स्वः
ॐ ऊरुजंघयोः
ॐ सः पुच्छे
त म धी स्य व दे गों भ
त्स ह्रि रो प दो व तु र्ग्यं
वि धि र ज सः सा या रे
तु यो यो नः प्र चो द वं

॥ [illegible]


र्व ५	स्य १३	प्र २१	सँ	ज	नः २०	व [illegible]	तु ४
रे ६	धी १४	चो २२	सा	र	यो १९	दे ११	वि ३
शि	व	स्थि	स	क्षः	श	के	वः
वो	ऌः	तो	दा	मु	या	वः	शि
जी	शि	जी	शि	श	बु	जी	वः
वः	वः	वः	वः	पा	य	न	शि
णि ७	म १५	द २३	ब	रो	यो १८	र्गो १०	त्स २
यं ८	हि १६	यात् २४	दों	प	धि १७	भ ९	त १

ॐ तपः उत्तरस्याम्

ॐ महः दक्षिणस्याम्

॥ ॐ स्वः पश्चिमस्याम् ॥

इंद्रायनमः पूर्वे



सोमायनमः
ईशानी
ब्रह्मणेनमः
आग्नेयी
आदित्यायनमः
भौमायनमः
प्रभायैनमः
नित्यायैनमः
विलासिन्यैनमः
प्रभावत्यैनमः
बुधायनमः
राहवेनमः
केतवेनमः
कुबेरायनमः उत्तरमुखे

श्रीगणेशायनमः ॥ अथविश्वामित्रकल्पप्रारंभः
॥ श्रीः ॥ स्वगुरुंपूजयेन्नित्यमुपचारैस्तुपंचकैः ॥
भक्तिश्रद्धानुसारेणविश्वामित्रंप्रकल्पयेत्॥ १ ॥
अस्यकृत्स्नस्यमंत्रस्यप्राणायामंनिरुंधयेत् ॥प्रा
णायामंनियम्याशुगुरुपूजापुरःसरं ॥ २ ॥ प्रात
रुत्थाययोविप्रः शयने पर्यवस्थितः ॥ एकाग्रमा
नसोभूत्वाध्यायेन्मूलेऽथ कुंडलीम् ॥ ३ ॥ नाभि
संनिहिताज्ञेयाद्वात्रिंशद्वर्णसंख्यया॥ एवंज्ञात्वा
प्रभातायांषडाधारंतथान्यसेत् ॥ ४ ॥ षडाधारं
तथावक्ष्येविन्यसेच्चतुरक्षरं ॥ आद्यंतप्रणवैर्युक्तं

षट्कुक्षिस्तुततोन्यसेत् ॥ ५ ॥ सहस्रदलमध्य
स्थांसबालांसतुरीयके ॥ हंसहंसेतिविज्ञानात्सं
कल्पध्यानपूर्वकम् ॥ ६ ॥ अस्याःसंकल्पमात्रे
णसर्वपापैः प्रमुच्यते ॥ ततोत्थायबहिर्गम्यमल
मूत्रविसर्जनं ॥ ७ ॥ दुर्गंधत्यागपर्यंतंकृत्वाशौचं
समाहितः ॥ ततोनदींसमागम्यगंगाध्यानपुरः
सरं ॥ ८ ॥ आचमनत्रयंकृत्वा त्रिवारंस्नानमाचरेत्
॥ अग्निमंडलमालिख्यजलमध्येसबिंदुकं ॥ माया
बीजेनमध्यस्थमुभयोर्व्याहृतित्रयं ॥ ९ ॥ ततः
शुद्धांबुनाचम्यप्राणायामत्रयंकुरु ॥ देशकाल

र्थमुच्चार्य्यगायत्रीध्यानपूर्वकम् ॥ १० ॥ सूक्ता
ग्निमार्जनंकुर्याद्यथाशाखोक्तमार्गतः ॥ अघमर्ष
णमंत्रंचस्नानंपंचांगपूर्वकं ॥ ११ ॥ श्रोत्रेनासा
क्षिरुद्ध्वाचसहस्रांतंजलेवपुः ॥ मग्नंकुर्य्याज्जपेन्मं
त्रंकुर्याद्वायुनिरोधनम् ॥ १२ ॥ ततः स्नानत्रयंकु
र्य्याच्छिरोव्याहृतिपूर्वकम्॥ त्रिवारांत्रिविधंस्ना
नंपायुमेढ्रंशिरस्तनुं ॥ १३ ॥ प्रोक्षयेत्शंखमुद्रा
भिर्व्याहृत्यादिशिरोन्तकम् ॥ ततस्तीरंसमाग
त्यगायत्रीकवचंपठेत् ॥ १४ ॥ शुचिवस्त्रांगमा
श्रित्यललाटेतिलकंतथा ॥ ओमापोज्योतिमंत्रे

 णशिखाबंधनमाचरेत् ॥ १५ ॥ त्रिकोणमध्ये-ह्रीं
कारंकोणान्तेप्रपदंतथा ॥ दंडेषुव्याहृतिश्चैवमु
ल्लिखेदुदकंतथा ॥ १६ ॥ प्रणवेनबहिर्जप्त्वाजलं
पीत्वाचमार्जनम् ॥ नतत्रविन्यसेत्संध्यामन्य
थाशूद्रवद्भवेत् ॥ १७॥ इति श्रीविश्वामित्रकल्पे
आन्हिकलक्षणयोगोनामप्रथमःपरिच्छेदः ॥ १॥
चतुर्विंशतिनामानितत्तत्स्थानेषुविन्यसेत् ॥ के
शवादीनिविन्यस्यपौराणाचमनंजपेत्॥ १॥ चतु २
र्विंशतिवर्णानांकेशवादिरनुक्रमात् ॥ देव्याःपा
दैस्त्रिभिःपीत्वाचांगुलैर्नवभिःस्पृशेत् ॥ २ ॥ सप्त

व्याहृतिगायत्री शिरस्तुर्यद्वयंन्यसेत्॥ श्रुतिस्मृतिविधानेनद्विविधंपरिकल्पयेत् ॥ ३ ॥ तृतीयं मूलमंत्रेण क्रमाद्वर्णानिविन्यसेत् ॥ आचमनस्याविधिःप्रोक्तःपुराणंस्मृतिरागमम् ॥ ४ ॥ श्रौतं मानसमाचम्यपंचाभिःश्रुतिचोदितैः ॥ संध्याप्रारंभकालेत्वाचमनत्रितयंन्यसेत् ॥५॥ कुरुतेसर्वसिद्धिःस्यान्नास्तिचेन्निष्फलंभवेत् ॥ संहतांगुलिनातोयंब्रह्मतीर्थेपिबेज्जलम् ॥ मुक्तांगुष्ठंकनिष्ठायांशेषेणाचमनंभवेत् ॥ ६ ॥ गोकर्णाकृतिहस्तेनमाषमात्रंजलंपिबेत् ॥ न्यूनातिरिक्तमात्रेणत

गा० ३ ज्वलंसुरयासमम् ॥ ७ ॥ आदौचांतेतथामध्ये वि० १
न्यसेच्चाचमनंक्रमात् ॥ श्रुतिस्मृतिपुराणानिप
र्यायेण विलोमतः ॥ ८ ॥ केशवादित्रिभिर्ना
मअपःपीत्वायथाविधि ॥ गोविंदमग्रतोन्यस्य
विष्णुंसौषुम्निविन्यसेत् ॥ ९ ॥ मधुसूदनआ
दित्यःशुद्धांशुश्चत्रिविक्रमः ॥ अग्रतोवामन
श्चैवहस्तयोःश्रीधरस्तथा ॥ १० ॥ हृषीकेशःपद्म
नाभउभयोः पादयोर्न्यसेत्॥दामोदरंब्रह्मरंध्रेना ३
सासंकर्षणस्यच ॥ ११ ॥ नासामध्येतुविन्यस्य
नासांतेवाविनिर्दिशेत् ॥ दक्षनासांतुविन्यस्य

वासुदेवंतथैवच ॥ १२ ॥ प्रद्युम्नंचतथावामेअनिरु
द्धंचदक्षिणे ॥ पुरुषोत्तमंवामनेत्रेदक्षिणेचअधोक्ष
जम् ॥ १३ ॥ नारसिंहंवामनेत्रेनाभौचाप्यच्युतं
न्यसेत् ॥ जनार्दनंहृदिन्यस्यभुजेदक्षिणबाहुके॥
॥ १४ ॥ इतिविश्वामित्रकल्पेआचमनयोगोना
म द्वितीयःपरिच्छेदः ॥ २ ॥ प्राणायामत्रयेणैवप्रा
तः संध्यांसमाचरेत्॥ प्राणायामसमायुक्तंप्राणा
यामामितिस्मृतम् ॥ १ ॥ उत्तमंनवधाचैवमध्य
मंऋतुसंख्यया ॥ अधमंत्रयमित्याहुःप्राणाया
मोविधीयते ॥ २ ॥ सप्तव्याहृतिभिश्चैवप्राणा

यामंपुटीकृतम् ॥ व्याहृत्यादिशिरोंतंचप्रागा
यामत्रयात्रिकं ॥ ३ ॥ सव्याहृतिंसप्रणवांगाय-
त्रींशिरसासह॥ त्रिःपठेदायतःप्राणान्प्रणायामः
सउच्यते ॥ ४ ॥ बिंदुतःप्राणमार्गंचगायत्रींबिं
दुसंयुतां ॥ व्याहृत्यादिशिरोंतंचप्राणायामत्र
यत्रिकं ॥ ५ ॥ आदौकुंभकमाश्रित्यरेचपूरक
वर्जितम् ॥ व्याहृत्यादिशिरोंतंचप्राणायामंतुकुं
भकम् ॥ ६ ॥ प्राणायामसमानांबिंदुसहितांबिंदु
त्रयंसंयुतं सप्तव्याहृतिबिंदुसंपुटपरंवेदादिपाद
त्रयम् ॥ गायत्रींशिरसात्रिनाडिसहितामीड्यद्व

येद्वैपरेशुद्धंकेवलकुंभकंप्रतिदिनंध्यायामितत्वं पदम् ॥ ७ ॥ अधमेद्वादशीमात्रामध्यमेद्विगुणामता ॥ उत्तमात्रिगुणाप्रोक्ताप्राणायामंनिरुंधयेत् ॥ ८ ॥ रेचकंकुंभकंचैवपूरकंवायुरोधनं॥ एवंक्रमेणयुंजीतप्राणायामस्यलक्षणम् ॥ ९ ॥ निषिद्धंरेचकंज्ञेयंपूरकंचतथैवच ॥ अमोघंकुंभकंप्रोक्तंप्राणायामंप्रकीर्तितम् ॥ १० ॥ अघोषनिर्घोषगमागमस्थंनाडीद्वयंरेचकपूरकंच॥ कुंभोपमंपूर्णघटप्रकारंह्येवंविधंस्याच्छ्वसनस्यसाध्यम् ॥ ११ ॥ शब्दपूर्वकमभ्यासंशब्दव्यंजनसं

युतम् ॥ भिन्नभांडोदकंयद्वत्तश्वसनस्यव्यातिक्र
मात् ॥ १२ ॥ इडापिंगलासुषुम्नाच्छिद्रपूर्वव्याति
क्रमात् ॥ तत्सर्वंनिष्फलंप्रोक्तमितिशंकरभाषि
तम् ॥ १३ ॥ ब्रह्मचारीगृहस्थश्चवानप्रस्थोयाति
स्तथा ॥ ततोधर्मंसमाश्रित्यप्राणायामाविदोवि
दुः ॥ १४ ॥ नासिकापुटमंगुल्यापंचाभिर्वायुरो
धनैः ॥ शनैःशनैस्तुनिःशब्दः प्राणायामंनिबोध
येत् ॥ १५ ॥ नासिकापुटमंगुल्यानिधायैकेन
मारुतम् ॥ आकृष्यधारयेदाग्निंप्राणायामंविचिं
तयेत् ॥ १६ ॥ प्राणायामनज्ञात्वाचस्नापयेच्चि

न्मयंशिवम् ॥ तदादौमानसंकुर्य्यात्तदाकेवल
कुंभकम् ॥ १७ ॥ पंचप्रजालकंचैवप्राणायामं
समाचरेत् ॥ पूजामानससंयुक्तंप्राणायामफलं
भवेत् ॥ १८ ॥ पंचपूजांविनायेनप्राणायामंक
रोतियः ॥ तस्यानिःफलितंकर्मविश्वामित्रेणभा
षितम् ॥ १९ ॥ लंकारंचहंकारंचयंकारंचरका
रयोः ॥ चकारमितिविख्यातंपंचपूजात्मकंजपे
त् ॥ २० ॥ सिद्धासनसमोनास्तिनकुंभेनैवलो
पमम् ॥ मंदद्दष्टिसमोनास्तिप्राणायामंसमभ्य
सेत् ॥ २१ ॥ अंतश्चेतोबहिश्चक्षुरधःस्थाप्यसु

 खासनम् ॥ समत्वंचशरीरंचप्राणायामंसमभ्य
 सेत् ॥ २२ ॥ अस्त्रप्रयोगकालेतु प्राणायामंच
लंबकः ॥ प्राणायामबलोपेतउपसंहारकारकः
॥२३॥तस्मात्सर्वप्रयत्नेनप्राणायामंसमाचरेत् ॥
सर्वधर्मपरित्यागीसमहापातकीभवेत् ॥२४॥ इ
तिविश्वामित्रकल्पेप्राणायामयोगोनामतृतीयः
परिच्छेदः ॥ ३ ॥ पादंपादंक्षिपेन्मूर्ध्निप्रतिप्रण
वसंपुटं ॥ निक्षिपेदष्टपादंतुअधोयस्यक्षयाय
च ॥ १ ॥ अष्टाक्षरंनवपदंपदादौब्रह्महाभवेत् ॥
ऋचादौमार्जनंकुर्य्यात्सोश्वमेधफलंलभेत् ॥२॥

यस्यक्षयायपादंतुअपःसिंधुत्वमेवच ॥ भूमौ
पादौविनिक्षिप्यइतरन्मूर्ध्निविन्यसेत् ॥ ३ ॥
प्रातःसूर्यश्चमंत्रेणसायमाग्निःपिबेज्जलम् ॥ आ
पःपुनंतुमध्याह्नेक्रमेणाचमनंन्यसेत् ॥ ४ ॥ आ
पोहिष्ठेतिमंत्रेणनवपादांद्विवारकम् ॥ हिरण्यव
र्णाश्चत्वारोदाधिमंत्रांद्विवारकम् ॥ ५ ॥ पदादौक्षीं
पदंमध्येपदांतेमार्जनंभवेत् ॥ ऋचादौप्रणवंचो
क्त्वाऋचांतेमार्ज्जनंभवेत् ॥ ६ ॥ सत्वंरजस्त
मोजातंमनोवाक्कायिकादिषु ॥ जाग्रत्स्वप्न
सुषुप्त्यादिनवैतान्नवभिर्दहेत् ॥७॥ दधिद्विमार्ज

गा० नंचैवहिरण्यादिचतुष्टयम् ॥ कामक्रोधादिषड्व वि०
७ र्गमार्ज्जयेत्सर्वमार्ज्जनम् ॥ ८ ॥ इतिश्रीविश्वा १
मित्रकल्पेमार्ज्जनयोगोनामचतुर्थःपरिच्छेदः ॥
॥ ४ ॥ संध्यावंदनवेलायामर्घ्यंदद्यात्त्रयंबुधः ॥
सायंप्रातःसमानंस्यान्मध्याह्नेचपृथक्विधिः ॥
॥ १ ॥ एकंमध्याह्नकालेतुसायंप्रातस्त्रयस्त्रयः ॥
एवंज्ञात्वासृजेदर्घ्यंसूर्यंनक्षत्रपूर्वकम् ॥ २ ॥ एकं
शस्त्रास्त्रनाशायएकंहननाशने ॥ असुराणांव ७
धायार्घ्यंप्रायश्चित्तार्थसंयुतम् ॥ ३ ॥ दद्यात्केव
लगायत्र्यामर्घ्यंतयोद्विजः ॥ सविंदब्राह्मणो

नामसर्वधर्मबहिष्कृतः ॥४॥ ब्रह्मास्त्रंनाभिजानाति सविप्रःशूद्रएवहि ॥ तस्यकर्मादिकंजातंधर्माद्यंनिष्फलंभवेत् ॥ ५ ॥ बीजमंत्रेण गायत्र्याःप्रणवेत्यभिधीयते ॥ ६ ॥ देहस्तुदंड इत्युक्तःसंज्ञाकवचमेवहि ॥ सर्वांगानिपदोमंत्रं सर्वमंत्रेत्वयंविधिः ॥ ७ ॥ अस्त्राष्टवारतः प्रोक्तागायत्रीव्याप्यउच्यते ॥ एतत्षणमंत्रकंज्ञात्वाअर्घ्यंदद्याद्विनामतः ॥ ८ ॥ एकंमध्याह्नकाले चप्रायश्चितंद्वितीयकम् ॥ द्वयमर्घ्यंतुमध्याह्ने तथामुक्तंमहामुने ॥ ९ ॥ अर्घत्रयंप्रयोगार्थंप्रा

गा० याश्चित्तंचतुर्थकम् ॥ सायंप्रातर्द्विजातीनामेवमे वि०
८ वविधिःक्रमात् ॥ १० ॥ ब्रह्मास्त्रंब्रह्मदंडंचब्रह्म १
शीर्षंचसंयुतम् ॥ अर्घत्रयंप्रयोगार्थमेवमेवमुदा
हृतम् ॥ ११ ॥ शस्त्रमादौततोदंडंशिखात्रीणि
समुच्चरेत् ॥ पर्यायेणत्रिरुच्चार्य्यमंजलिंचात्रिधा
हरेत् ॥ १२ ॥ अर्घ्यत्रयंप्रयोक्तव्यमभिमंत्रित
मंजलिम् ॥ त्रियुक्तंविसृजेदर्घ्यमसुराणांवधाय
च ॥ १३ ॥ अस्त्रदंडशिरोयुक्तमर्घ्यमेकंसमुच्चरे ८
त् ॥ अस्त्रंवाहनरक्षोघ्नमेकांजलिजलंक्षिपेत् ॥
॥ १४ ॥ प्रायश्चित्तंद्वितीयार्घ्यमसुराणांवधाय

च ॥ प्रदक्षिणंपृथिव्यांचसर्वपापैःप्रमुच्यते ॥
॥ १५ ॥ असावादित्यमंत्रेणब्रह्मेत्यादिप्रदक्षिण
म् ॥ आपोभिरयुतंकार्यांसर्वांघौघनिकृंतनम् ॥
॥१६॥ हंसहंसेतिमंत्रस्यबृहत्यंतंसमुच्चरन् ॥शि
रसादंडमस्त्रंचसन्मुखेइवानिक्षिपेत् ॥ १७ ॥ उप
मंत्रंसमुच्चार्य्यशिरस्तत्रसमुद्धरेत् ॥ अर्घ्यमेकं
तुमध्याह्नेतथामुक्तंमहामुने ॥ १८ ॥ तर्ज्जन्यंगु
ष्ठयोगेनराक्षसीमुद्रिकाभवेत् ॥ राक्षसीमुद्रिका
दत्तंतत्तोयंरुधिरंभवेत् ॥ १९ ॥ निक्षिपेद्यदिमूढा
त्मारौरवंनरकंव्रजेत् ॥ अंगुष्ठछायापतितंदेवता

गा० मुद्रिकाभवेत् ॥ २० ॥ देवतामुद्रिकादत्तंसर्वैःपा वि
९ पैःप्रमुच्यते ॥ एवंविज्ञानमात्रेणसद्यःसिद्धिर्भवि १
ष्यति ॥ २१ ॥ इतिश्रीविश्वामित्रकल्पेअर्घ्यदा
नयोगोनामपंचमःपरिच्छेदः ॥ ५ ॥ ॐमित्येका
क्षरंचोक्तंन्यासंध्यानपुरःसरम् ॥ यथाशक्तिज
पंकुर्य्यान्नित्यकर्मसमाचरेत् ॥ १ ॥ शुचिभू
मौलिखेद्यंत्रंबीजंबिंदुसमन्वितम् ॥ बीजराजंलि
खेन्मध्येवह्निमंडलमध्यगे ॥ २ ॥ चतुरस्रंत ९
तोहस्तंसुदृढंमृदुनिर्मलम् ॥ तत्रोपरिसमा
सीनोगायत्रींजपमाचरेत् ॥ ३ ॥ खशुद्धिंभूत

शुद्धिंचकृत्वाशोषणदाहनम् ॥ प्लवनेचततःकु
र्यात्प्रणवादित्रयंक्षरैः ॥ ४ ॥ प्राणायामसमायु
क्तअंतर्बाह्यंसमातृकात् ॥ देहेन्यासंततःकुर्या
त्करांगन्यासमाचरेत् ॥ ५ ॥ ऋषिंन्यसेत्पूर्वमु
खेतथाछंदउदीरितम् ॥ देवताहृदिविन्यस्यगु
ह्येबीजमितिस्मृतम् ॥ ६ ॥ आधारेशक्तिंविन्य
स्यपादयोःकीलकंन्यसेत् ॥ एवंन्यासविधिंकृ
त्वाऋष्यादिन्यासपूर्वकम् ॥ ७ ॥ आवाहनादि
भेदंचदशमुद्राःप्रदर्शयेत् ॥ आयातुवरदादेवी
अंगप्रत्यंगसंगमे ॥ ८ ॥ प्रातर्गायत्रीसावित्रीम

ध्याह्नेचसरस्वती ॥ एवमावाहनंज्ञात्वासंध्यायां
जपमाचरेत् ॥ ९ ॥ हस्ताभ्यामनुलोमेनआवा
हनमनाहुते ॥ नामत्रयमृषिच्छंदःक्रमेणावाहनं
भवेत् ॥ १० ॥ मूलाधारेणगायत्रीसावित्रीमणि
पूरके ॥ द्वादशारेसरस्वतीछंदोनाडीत्रयंतथा ॥
॥ ११ ॥ ऋषिर्मूर्ध्निसुविज्ञेयआवाहनमनुक्रमात् ॥
आवाहनंयथोक्तंचयथोक्तंतुविसर्ज्जनम् ॥ १२ ॥
एवंजानीहिविप्रेंद्रजपध्यानंसमाचरेत् ॥ आवा
हनंततोन्यासंविनाजाप्यंतुनिष्फलम् ॥ १३ ॥ च
तुर्विंशतिगायत्रींप्रातःस्नात्वाजपेन्मनुम् ॥ प्रा

णायामंततःकुर्यान्न्यासध्यानंसमाचरेत् ॥१४॥
करन्यासंततःकुर्यादंगन्यासंतथैवच ॥ चतुश्चतु
श्चतुष्कंचचतुश्चतुश्चतुश्चतुः ॥ १५ ॥ षडंगंविन्य
सेद्देवींगायत्रींवेदमातरम् ॥ व्याहृतित्रयमुच्चार्य
अनुलोमंचाबिभ्रतः ॥ १६ ॥ करांगन्यासमार
भ्यगायत्रीपूर्ववद्भवेत् ॥ अकारंचउकारंचमका
रंबिंदुसंयुतम् ॥ १७ ॥ अनुलोमंन्यसेत्तत्रत्रि
रक्षरसमन्वितम् ॥ चतुर्विंशतिवर्णानांपल्लवोय
मुदाहृतः ॥ १८ ॥ चतुरक्षरसंयुक्तंकरांगन्यास
माचरेत् ॥ तूर्यपादंविनान्यासंआद्यंतंप्रणवैः

सह ॥ १९ ॥ व्याहृतित्रयमुच्चार्यचतुरक्षरसंयु
तम् ॥ पुनर्व्याहृतिमुच्चार्यकरांगन्यासमाचरेत्
॥ २० ॥ पादंपादंद्विपादंचप्रतिप्रणवसंपुटम् ॥
करांगन्याससंयोगात्षड्भागौत्रिपदाभवेत् ॥
॥ २१ ॥ अंगुष्ठादिचतुर्वर्णामनुलोमक्रमेणतु ॥
हृदयादिचतुर्वर्णाःक्रमेणैवविलोमतः ॥ २२ ॥ च
तुर्वर्णान् विनायस्तान् विपर्णंसंन्यसेद्द्विजः ॥ त
स्यवैफल्यमाप्नोतिसत्यंसत्यंनसंशयः ॥ २३ ॥
अंगन्यासंकरन्यासंदेहन्यासंविनाजपेत् ॥ अंध
त्वंबाधिरत्वंचमूकत्वंप्राप्नुयान्मनुः ॥ २४ ॥ इति

श्रीविश्वामित्रकल्पेआवाहनादियोगोनाम षष्ठः परिच्छेदः ॥ ६ ॥ ध्यानंमुद्रांनमस्कारंगुरुमंत्रंतथैवच ॥ संयोगमात्मासिद्धिश्चपञ्चधैवंविभावयेत् ॥ १ ॥ प्रातःकेवलगायत्रीमध्याह्नेव्याहृतीयुता ॥ सायाह्नेतूर्य्ययायुक्तानित्यजाप्यंसमाचरेत् ॥ २ ॥ पादादौरेफसंयुक्तागायत्रीजपलक्षणम् ॥ ३ ॥ पादत्रयंसमुच्चार्यप्रतिलोमंततश्चरेत् ॥ रेफबिंदूतदाद्यंतौगायत्रीजपमाचरेत् ॥ ४ ॥ गायत्रींपूर्वमुच्चार्य्यतुर्य्यांत्यादिविलोमतः ॥ सायंसंध्यांजपेदेवंसाधकःसर्वसिद्धये ॥ ५ ॥ तकारा

दियकारांतमनुलोमंविलोमतः ॥ तुर्यंपादंविनामं
त्रंप्रातःसंध्यामथाचरेत् ॥ ६ ॥ भकारादिहिका
रांतंमध्यपादमितिस्मृतम् ॥तार्तीयंतुप्रयोक्तव्यं
तदर्ध्येंप्रथमंभवेत् ॥७॥ धकारादियकारांतंतृती
यंपादमुच्चरेत् ॥ प्रथमंचद्वितीयंचत्रिविधंजपल
क्षणम् ॥ ८ ॥ कालत्रयंत्रिधाजाप्यंत्रिकालंत्रिवि
धंस्मृतम् ॥ अनुलोमविलोमाभ्यांचिरंसिद्धिम
वाप्नुयात् ॥९॥ चतुर्विंशतिवर्णानामनुलोमंजपेद
पि ॥ पूर्णजाप्यफलंनास्तिअर्द्धंजाप्यफलंलभेत्
॥ १० ॥ चतुःपादंतुगायत्रीअनुलोमविलोमतः॥

नित्यंजाप्यं प्रकुर्वीतभुक्तिंमुक्तिंलभेन्नरः ॥ ११॥
नित्यनैमित्तकाम्यादिव्यस्ताव्यस्तं जपेन्मनु
म्॥प्रातर्मध्याह्नसायाह्नेजपेदेवंक्रमेणतु ॥ १२ ॥
जपपारायणंकुर्य्यात्रिपदासंपुटंनव ॥ एवंज्ञात्वा
जपेन्नित्यमेकः कोटिगुणंभवेत् ॥ १३ ॥ कालत्र
यंयथोक्तंचजाप्यपारायणंपरम् ॥ अनंतफलमा
प्नोतिसत्यंसत्यंनसंशयः ॥ १४ ॥ अष्टोत्तरसह
स्रंवाअष्टोत्तरशतंतुवा ॥ अष्टाविंशतिमेवाथगा
यत्रीदशकंजपेत् ॥ १५ ॥ ॐकारःपुरुषश्चैवगा
यत्रीसुंदरीतथा॥तयोःसंयोगकालेतुवस्त्रमाच्छा

घगण्यते ॥ १६ ॥ वरेण्यंविरलंचोक्ताजपकाले
विशेषतः ॥ पारायणेषुयुक्तंस्यादन्यथा विफला
भवेत् ॥ १७ ॥ इतिश्रीविश्वामित्रकल्पे त्रिकाल
जपयोगोनामसप्तमःपरिच्छेदः ॥ ७ ॥ इतिविश्वा
मित्रकृतगायत्रीकल्पःसम्पूर्णः ॥

॥ अथगायत्रीपद्धतिः ॥

ब्रह्मविष्णुशिवाराध्यांगायत्रींलोकपावनीम् ॥
नमस्कृत्यानुरोधेनलिखेयंपद्धतिंक्रमात् ॥ १ ॥
साधकःब्राह्ममुहूर्त्तेचोत्थाययथोक्तंशौचंकृत्वान
द्यादौस्नानंकृत्वाप्राणायामत्रयं कृत्वाअर्घ्यांतां

संध्यांकुर्यात् ॥ प्राणायामोयथा ॥ ॐभूः ॐभुवः
ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ
तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥ धियोयोनः
प्रचोदयात् ॥ आपोज्योतीरसोमृतंब्रह्मभूर्भुवः
स्वरोम् ॥ प्रणवस्यब्रह्माऋषिःगायत्रीछंदःपरमा
त्मादेवताशरीरशुद्ध्यर्थेजपेविनियोगः ॥ ब्रह्मणे
नमःशिरसि गायत्रीछंदसेनमःमुखे परमात्मादे
वतायैनमःहृदये ॥ करसंपुटंकृत्वासमस्तदुरित
क्षयार्थेन्यासंकरिष्ये ॥ व्याहृतीनांजमदग्निभर
द्वाजात्रिगौतमकाश्यपविश्वामित्रवशिष्ठादिऋ

षिभ्यो नमः शिरसि॥ सप्तार्चिरनिलसविताप्रजा
पतिवरुणेंद्रविश्वेदेवादेवताभ्योनमःमुखे ॥ गाय
त्र्युष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुप्जगतीछंदोभ्यो
नमः हृदि ॥एवंकरसंपुटंकृत्वासमस्तदुरितक्षया
थैंगायत्रीन्यासः ॥ गायत्र्याविश्वामित्र ऋषये
नमःशिरसि॥ गायत्रीछंदसेनमःमुखे॥परमात्मा
देवतायैनमःहृदये ॥ ॐभूःनमःहृदये ॥ ॐ भुवः
नमःमुखे ॥ ॐ स्वःनमःदक्षांसे ॥ ॐमहःनमःवा
मांसे ॥ ॐ जनःनमःदक्षिणोरौ ॥ ॐ तपःनमःवा
मोरौ ॥ ॐ सत्यंनमःजठरेइतिव्याहृतिन्यासः ॥

अथाक्षरन्यासः ॥ ॐ तंनमःगुल्फयोः ॥ ॐ सं
नमःपदपार्श्वयोः ॥ ॐ विंनमः जान्वोः ॥ ॐ तुंन
मःपादमुखयोः ॥ ॐ वंनमः जंघयोः ॥ ॐ रेंन
मःनाभौ ॥ ॐ णिंनमःहृदये ॥ ॐ यंनमः कंठे
॥ ॐ भंनमःहस्तयोः ॥ ॐ गौंनमःमणिबंधयोः
॥ ॐ देंनमःकूर्परयोः ॥ ॐ वंनमःबाहुमूलयोः
॥ ॐ स्यंनमः आस्ये ॥ ॐ धींनमःनासापुट
योः ॥ ॐ मंनमःकपोलयोः ॥ ॐ हिंनमःनेत्र
योः ॥ ॐ धिंनमःकर्णयोः ॥ ॐ योंनमःभ्रूम
ध्ये ॥ ॐ योंनमःमस्तके ॥ ॐ नंनमःपश्चिम

वक्त्रे॥ॐ प्रंनमः उत्तरवक्त्रे ॐ चोंनमः दक्षिणव
क्त्रे॥ ॐ दंनमः पूर्ववक्त्रे॥ ॐ यात्नमः ऊर्ध्वव
क्त्रे॥ इत्याक्षरन्यासः॥ अथपदन्यासः॥ ॐ तत्
नमः शिरसि॥ ॐ सवितुर्नमः भ्रुवोर्मध्ये॥ ॐ वरे
ण्यंनमः नेत्रयोः ॥ ॐ भर्गःनमः मुखे॥ ॐ देव
स्यनमः जठरे॥ ॐ धीमहिनमः हृदये॥ ॐ धि
यःनमः नाभौ॥ ॐ यः नमः गुह्ये॥ ॐ नः नमः
जान्वोः॥ ॐ प्रचोदयात्नमः पादयोः॥ ॐ आ
पोज्योतीरसोऽमृतंब्रह्मभूर्भुवःस्वरोमितिशिरसि
॥ इतिपदन्यासः॥ अथपादन्यासः॥ ॐ तत्स

वितुर्वरेण्यंनमः नाभ्यादिपादपर्यंतम् ॥ ॐ भर्गो
देवस्यधीमहिनमः हृदयादिनाभ्यंतम् ॥ ॐ धि
योयोनःप्रचोदयात्नमःमूर्धादिहृदयांतम् ॥ ॐ
परोरजसेसावदोंइतिमूर्ध्निविन्यस्य ॥ अथषडंग
न्यासः॥ ॐ ब्रह्मणेहृदयायनमः ॥ॐ विष्णवेशि
रसेस्वाहा ॥ ॐ रुद्रायशिखायैवषट् ॥ॐ ईश्वरा
यकवचायहुम्॥ॐ सदाशिवायनेत्रत्रयायवौषट्
॥ ॐ सर्वात्मनेअस्त्रायफट्इतिमंत्रेणोर्ध्वाधस्ता
लत्रयंकृत्वाछोटिकमुद्रयादिग्बंधनंविधायमूले
नव्यापकंकुर्य्यात् ॥ इतिषडंगम् ॥ अथलयां

गा० १६

गन्यासः ॥ ॐ अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔं अंअः कंखंगंघंङंचंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपं फंबंभंमंयंरंलंवंशंषंसंहंळंक्षं ॥ ॐ भूर्भुवः स्वः तत्स वितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनः प्र चोदयात् ॥ क्षंळंहंषंशंवंलंरंयंमंभंबंफंपंनंधंदंथं तंणंढंडंठंटंञंझंजंछंचंङंघंगंखंकंअः अंऔंओंऐं एंॡंऌंॠंऋंऊंउंईंइंआंअं त्यादचोप्रनःयोयोधि हिमधीस्यवदेगोंभर्यंणिरेर्वतुवित्सतस्वः वः भुर्भू ओं इतिहृदयादिमुखांतम् ॥ एवमेवहृदयादिके शांतम् ॥ तथैवव्याप्य ॥ इतिलयांगन्यासः ॥

वि० २ १६

इतिविन्यस्यपीठन्यासंकुर्य्यात् ॥ ॐमंमंडू
काथनमः मूलाधारे ॥ ॐकंकालाग्निरुद्रायनमः
स्वाधिष्ठाने ॥ ॐमंमूलप्रकृत्यैनमःनाभौ ॥ ॐ
आंआधारशक्तयेनमःहृदये ॥ ॐकंकूर्मायनमः
॥ वंवराहायनमः ॥ धंधारिण्यैनमः ॥ संसुधासिं
धवेनमः ॥ रंरत्नद्वीपायनमः ॥ मंमणिमंडपाय
नमः ॥ कंकल्पवृक्षायनमः ॥ स्वंस्वर्णवेदिकायै
नमः ॥ रंरत्नसिंहासनायनमःदक्षांसे ॥ धंधर्माय
नमःवामांसे ॥ ज्ञांज्ञानायनमः वामोरौ ॥ वंवैरा
ग्यायनमःदक्षोरौ ॥ ऐंऐश्वर्यायनमःमुखे ॥ अं

गा० अधर्मायनमःवामपार्श्वे ॥ अंअज्ञानायनमःद प०
१७ क्षपार्श्वे ॥ अंअवैराग्यायनमःनाभौ ॥ अंअनैश्व २
र्यायनमःहृदये ॥ अंअनंतायनमःउपर्युपरिवि
न्यसेत् ॥ अंअंबुजायनमः ॥ संसंविन्नालायन
मः ॥ संसर्वतत्वात्मकायपद्मायनमः ॥ प्रंप्रकृ
तिमयपत्रेभ्योनमः ॥ विंविकारमयकेशरेभ्यो
नमः ॥ पंपंचाशद्वर्णकर्णिकायैनमः ॥ अंद्वादश
कलात्मनेसूर्यमंडलायनमः ॥ अंषोडशकलात्म १७
नेचंद्रमंडलायनमः ॥ संसत्वात्मनेनमः ॥ रंरज
सेनमः ॥ तंतमसेनमः ॥ आंआत्मनेनमः ॥ अंअं

तरात्मनेनमः ॥ पंपरमात्मनेनमः ॥ ह्रांदीप्तायै
नमः ॥ ह्रींसूक्ष्मायैनमः ॥ ह्रांविद्युतायैनमः ॥ पी
ठमध्येसर्वतोमुख्यैनमः ॥ तदुपरिनित्यपूजाच
क्रंविधाय ॥ ॐब्रह्माविष्णुरुद्रांबिकात्मकायसौर
पीठात्मनेनमः ॥ इतिपीठन्यासः ॥ मूलेनप्राणा
यामत्रयंकृत्वामूलेनव्यापकंकृत्वाध्यायेत् ॥ मु
क्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्ता
मिंदुनिबद्धरत्नमुकुटांतत्वार्थवर्णात्मिकाम् ॥ गा
यत्रींवरदाभयांकुशकशांशुभ्रंकपालंगुणंशंखंच
क्रमथारविंदयुगुलंहस्तैर्वहंतींभजे ॥ इतिध्या

गा० त्वाबहिःपूजोक्तरीत्यादेवींसौवर्णींचसंपूज्य गं १०
१८ धपुष्पधूपदीपनैवेद्यतांबूलाद्युपचारान् प्रकल्प्य २
किंचिज्जपित्वा ॥ स्वागतंदेवदेवेशिसन्निधौमे
महेश्वरि ॥ गृहाणमानसींपूजांयथार्थपरिभा
विताम् ॥ १ ॥ दशधामूलंजपित्वाजपंदेव्याः
करेसमर्प्यमनसापुष्पांजलिंदत्त्वाक्षणंतदात्मकं
विभाव्य वरदाभयांकुशकशाकपालगुणशंखच
क्राभयोनिइत्यादिमुद्राःप्रदर्शयेत् ॥ इतिमा १८
नसीपूजा ॥ अथबाहिःपूजार्थमनुज्ञाप्यबाहिः
पूजांकुर्य्यात् ॥ स्ववामेअस्त्रक्षालितां त्रिपादुकां

निधायतदुपरि अस्त्रक्षालितं कलशंनिधायशुद्ध
तोयंमूलेनापूर्यमूलेनाष्टकृत्वोऽभिमंत्र्यजातवेद
सेइत्यृचात्र्यंबकामीति ऋचागायत्र्यासकृदाभिमं
त्र्यगंधपुष्पाभ्यांपूजयेदितिकलशसंस्थापनम् ॥
सामान्यार्घ्यस्थापनाविधिः ॥ तत्रास्त्रक्षालितं
ताम्रपात्रंनिधायमूलेनापूर्य्यमूलेनाष्टवारंसंमंत्र्य
गंधपुष्पाभ्यांपूजयेदिति सामान्यार्घ्यस्थापन
विधिः ॥ पीठात्मनोर्मध्येचंदनेनकनिष्ठिकया
त्रिकोणंषट्कोणंकृत्वाअग्नयेहृदयायनमः ॥ ई
शानायाशिरसेस्वाहा ॥ निर्ऋत्यैवषट् ॥ वायवे

गा० कवचायहुम्॥ अग्नयेअस्त्रायफट्॥ नेत्रत्रयायवौ प०
१९ षट्॥ पूर्वैंअस्त्रायफट्॥ सामान्यार्घ्यजलेनचंदने २
नपूजयेत्॥ त्रिकोणंआधारंस्थापयामि॥ आं
आधारशक्तिंस्थापयामि॥ पृथीवीद्वीपंस्थापया
मि॥ तत्रपूजा॥ अग्निमंडलद्वादशकलात्मनेन
मः॥ धुंधूम्रायैनमः॥ जंज्वलिन्यैनमः॥ विंवि
स्फुलिंगिन्यैनमः॥ सुंसुरूपायैनमः॥ कंकपिला
यैनमः॥ हंहव्यवाहनायैनमः॥ कंकव्यवाहनायै १९
नमः॥ इतिआधारपूजा॥ आधारोपरिअर्घ्य
पात्रंसंस्थाप्यपात्रोपरिपूजा॥ अंअर्कमंडलाय

द्वादशकलात्मनेनमः ॥ तंतापिन्यैनमः ॥ धुंधू
म्रायैनमः ॥ मंमरीच्यैनमः ॥ जंज्वालिन्यैन
मः ॥ रुंरुच्यैनमः ॥ सुंसुमुखायैनमः ॥ भोंभो
गदायैनमः ॥ विंविश्वायैनमः ॥ बोंबोधिन्यै
नमः ॥ धांधारिण्यैनमः ॥ क्षंक्षमायैनमः ॥ इत्य
र्घपात्रपूजा ॥ विलोममात्रिकामुच्चरन् शुद्धज
लमापूर्य ॥ ॐक्षंनमः ॥ प्रणवःसर्वत्र ॥ ळंनमः ॥
हंनमः ॥ संनमः ॥ षंनमः ॥ शंनमः ॥ वंनमः ॥ लं
नमः ॥ रंनमः ॥ यंनमः ॥ मंनमः ॥ भंनमः ॥ बंन
मः ॥ फंनमः ॥ पंनमः ॥ नंनमः ॥ धंनमः ॥ दंन

गा० मः ॥ थंनमः ॥ तंनमः ॥ णंनमः ॥ ढंनमः ॥ डंन १०
२० मः ॥ ठंनमः ॥ टंनमः ॥ ञंनमः ॥ झंनमः ॥ जंन २
मः ॥ छंनमः ॥ चंनमः ॥ ङंनमः ॥ घंनमः ॥ गंनमः ॥
खंनमः ॥ कंनमः ॥ अःनमः ॥ अंनमः ॥ औंनमः ॥
ओंनमः ॥ ऐंनमः ॥ एंनमः ॥ ॡंनमः ॥ ऌंनमः ॥
ॠंनमः ॥ ऋंनमः ॥ ऊंनमः ॥ उंनमः ॥ ईंनमः ॥
इंनमः ॥ आंनमः ॥ अंनमः ॥ तत्रपूजा ॥ संसोम
मंडलायषोडशकलात्मनेनमः ॥ अंअमृतायैन २०
मः ॥ मंमानदायैनमः ॥ पुंपूषायैनमः ॥ संसमृ
द्ध्यैनमः ॥ तुंतुष्ट्यैनमः ॥ पुंपुष्ट्यैनमः ॥ रंरत्यै

नमः ॥ ज्योंज्योत्स्नायैनमः ॥ श्रिंश्रियैनमः ॥
कींकीर्त्यैनमः ॥ अंअङ्गदायैनमः ॥ पूंपूर्णायैन
मः ॥ १६ ॥ अंकुशमुद्रयातीर्थमावाह्य ॥ गंगेचय
मुनेचैव गोदावरिसरस्वति॥ नर्मदेसिंधुकावेरिज
लेस्मिन्सन्निधौभव ॥ योनिमुद्रांप्रदर्श्य धेनुमु
द्रयामृतीकृत्यशंखमुद्रां प्रदर्श्यगंधादिभिःसं
पूज्यमूलेनाष्टवारमभिमंत्र्यमत्स्यमुद्रयाच्छाद्य
सामान्यार्घ्यजलेनासिंचयेत् ॥ आत्मतत्वायैन
मः॥ विद्यातत्त्वायैनमः॥ शिवतत्वायैनमः॥ परो
रजसेसावदोमितिसप्तकृत्वोऽभिमंत्र्य तज्जलदेव

गा० तात्मैक्यंविभाव्यकिंचित्पात्रांतरे गृहीत्वापूजो प०
२.१ पकरणसामग्रीमात्मानंचात्रिःप्रोक्षयेदितिविशे २
षार्घ्यस्थापनविधिः ॥ अर्घ्यस्योत्तरे पात्रचतु
ष्टयंपाद्याचमनीयमधुपकार्थंसंस्थाप्यसकृदाभि
मंत्र्यतोयेनापूर्य्यमूलेनत्रिवारमभिमंत्र्यन्यास
क्रमेण धर्मादीन्प्रोक्षणीरूपेणसंपूज्यतस्मिन्पी
ठोपरिदेवताविभाव्यसर्वांगेषुपंचपुष्पांजलिंद
त्वा मूलाधारात्कुंडलीमुत्थाप्यद्वारेस्थित्वातत्र २१
परमात्मनासंयोज्यतद्दृष्टद्यामृतधारयादेवींप्रीण
यित्वादेवीं प्रसन्नांविभाव्यस्वशरीरंदेव्यात्मैक्यं

विभाव्यआसनादिदीपांतानुपचारान्प्रकल्प्य ॥
बाह्यनैवेद्यंनदेयमितिसंप्रदायः। शिवोभूत्वाशिवं
यजेदितिवचनात् ॥ अथपीठपूजा ॥ मंमंडूका
यनमः ॥ कंकालाग्निरुद्रायनमः ॥ मुंमूलप्रकृत्यै
नमः ॥ आंआचारशक्त्यैनमः ॥ कुंकूर्मायैनमः ॥
अंअनंतायनमः ॥ वंवराहायनमः ॥ धंधरित्र्यै
नमः ॥ सुंसुधासिंधवेनमः ॥ रंरत्नद्वीपायनमः ॥
मंमणिमंडपायनमः ॥ कंकल्पतरवेनमः ॥ स्वं
स्वर्णवेदिकायैनमः ॥ तदुपरिरत्नसिंहासनाय
नमः ॥ आग्नेयादिकोणेषु धंधर्मायनमः ॥ ज्ञंज्ञा

गा० नायनमः॥ वंवैराग्यायनमः॥ अंऐश्वर्यायनमः॥ प०
२२ पूर्वादिदिक्षु अंअधर्मायनमः ॥ अंअज्ञानायन २
मः॥ अंअवैराग्यायनमः॥ अंअनैश्वर्यायनमः॥
मध्येअंअनंतायनमः॥ अंअंबुजायनमः ॥ आं
आनंदायनमः॥ संसंविन्नालायनमः ॥ संसर्वत
त्वात्मकपद्मायनमः ॥ पंप्रकृतिमयपत्रेभ्योन
मः॥ विंविकारमयकेशरेभ्योनमः॥ पंपंचाशद्वर्ण
कर्णिकायैनमः॥ अंद्वादशकलात्मनेवह्निमंडला
यनमः॥ संसत्वायनमः॥ रंरजसेनमः॥ तंतमसे २२
नमः॥ आंआत्मनेनमः॥ अंअंतरात्मनेनमः॥

कंकालात्मनेनमः ॥ एतान्युपरिउपरि ॥ अथ
पीठपूजा ॥ पीठस्यपूर्वभागेरांदीप्तायैनमः ॥
रींसूक्ष्मायैनमः ॥ रूंभद्रायैनमः ॥ रैंविभूत्यैन
मः ॥ रौंविमलायैनमः॥ रःअमोघायैनमः॥ रांवि
द्युतायैनमः॥ पीठमध्ये परदेवतायैनमः ॥ सर्वतो
मुख्यैनमः ॥ तदुपरिविंदुत्रिकोणावृतदलाष्टकरे
खात्मकंचतुरस्रंचतुर्द्वारोपशोभितंयंत्रंसंस्थाप्य
ब्रह्मविष्णुरुद्रबिंबात्मकसौरपीठायनमः ॥ इति
पीठेसंपूज्य ॥ इतिपूजासमाप्ता ॥ अथपूर्वोक्तंऋ
ष्यादिन्यासंकृत्वाप्राणानायम्य मूलेनव्यापकं

गायत्र्युच्चारपूर्वकंहस्ताभ्यांपुष्पांजलिं गृहीत्वा
नासारंध्रेणपुष्पसंचयकल्पितयंत्रमये कल्पित
मूर्तौनिक्षिप्यतत्तत्स्थानगतानिआवरणानिध्या
त्वाआवाहनादिमुद्राःप्रदर्श्यावाहनंसान्निधानंस
न्निरोधनं सम्मुखीकरणम् अवगुंठनम् सकली
करणंमूलांतेश्रीगायत्रीदेविइहावाहिताभवपुष्पे
नदेव्याहृदिकरं निधायआंह्रींक्रोंइति द्वादशवा
रंजपेत्ततोभूतशुद्धिंप्राणप्रतिष्ठांविधायपूजये
त् ॥ नमःइतिमंत्रेणदेव्याःपादांबुजेपाद्यंदद्यात्
स्वाहेतिमंत्रेणमूर्ध्न्यर्घ्यंवमितिमंत्रेणमुखेआच

मनम् ततःस्नानशालायांसुगंधसलिलैःस्नापयि
त्वामूलेनशतसंख्येनवाराजोपचारैः स्नापयि
त्वांगप्रोक्षणंकृत्वा मूलेनपीठंसंस्थाप्यपूर्वोक्तां
ध्यात्वापंचोपचारैः सम्पूज्यदेवतांप्रसन्नांविभा
व्य आवरणपूजांकुर्यात् ॥ तत्रमध्येत्रिकोणे
व्याहृत्यैनमः ॥ अथकोणेगायत्र्यैनमः ॥ नैर्ऋ
त्यकोणेसावित्र्यैनमः ॥ वायुकोणेसरस्वत्यैन
मः॥ त्रिकोणांतरालेषुब्रह्मणेनमः॥ विष्णवेनमः॥
रुद्रायनमः ॥ मूलेनपुष्पांजलिंगृहीत्वा ॥ अभी
ष्टसिद्धिंमेदेहिशरणागतवत्सले॥ भक्त्यासमर्पये

गा० तुभ्यंप्रथमावरणार्चने ॥ अनेनपुष्पांजलिंदत्त्वा १०
२४ द्वितीयावरणंपूजयेत् ॥ अष्टदलेषुपूर्वादिदिक्षु २
ॐआदित्यायनमः ॥ भानवेनमः ॥ भास्कराय
नमः ॥ रवयेनमः ॥ आग्नेयादिकेशरेषु उषायैन
मः ॥ प्रभायैनमः ॥ प्रजायैनमः॥ संध्यायैनमः ॥
मूलमुच्चरन् अभीष्टसिद्धिंमेदेहीतिपुष्पांजलिंद
द्यादितिद्वितीयावरणं ॥ अथतृतीयम् ॥ हृदिब्र
ह्मणेनमः ॥ हृदयायनमः ॥ ईशानेरुद्रायशिखायै २४
वषट् ॥ नैर्ऋत्येईश्वरायकवचायहुम् ॥ वायव्ये
सदाशिवायनेत्रत्रयायवौषट् ॥ आग्नेयेसर्वात्म

नेअस्त्रायफट् तत्तद्देवताभ्योनमः मूलेन ॥ अभी
ष्ट० इतितृतीयावरणम् ॥ अथचतुर्थम् ॥ तद्बाहिः
पूर्वाद्यष्टदलेषु ॥ ॐअमृतायैनमः ॥ नित्यायै
नमः ॥ विश्वंभरायैनमः ॥ ईशान्यैनमः ॥ प्रभा
यैनमः ॥ जयायैनमः ॥ विजयायैनमः॥ शांत्यैन
मः॥ मूलेनपुष्पांजलिंअभीष्टसिद्धिमितिचतुर्था
वरणम् ॥ अथपंचमम् ॥ तद्बाहिःपूर्वाद्यष्टदिक्षु
ॐकांत्यैनमः ॥ दुर्गायैनमः ॥ सरस्वत्यैनमः ॥
विद्यारूपायैनमः ॥ विशालायैनमः ॥ ईशानायै
नमः ॥ वायव्यैनमः॥ विमलायैनमः ॥ मूलमुच्चर

गा० पं०

२९ २

न्नभीष्टसिद्धिमितिपुष्पांजलिंदद्यादितिपंचमाव
रणम् ॥ अथषष्ठम् ॥ पूर्वाद्यष्टदिक्षु संहारिण्यै
नमः ॥ सूक्ष्मायैनमः ॥ विश्वयोन्यैनमः ॥ जया
वहायैनमः ॥ पद्मालयायैनमः ॥ परायैनमः ॥
शोभायैनमः ॥ रूपायैनमः ॥ मूलेनपुष्पांजलिं
अभीष्टसिद्धिमितिषष्ठावरणम् ॥ अथसप्तमम् ॥
पूर्वाद्यष्टदिक्षु ॐ आंब्राह्म्यैनमः॥ ॐ ईमाहेश्वर्यै
नमः ॥ ॐ ऊंकौमार्यैनमः ॥ ॐ ऋंवैष्णव्यैन २९
मः॥ ॐ लंवाराह्यैनमः॥ ॐ औंचामुंडायैनमः॥
ॐ अः चंडिकायैनमः ॥ मूलमुच्चार्यअभीष्ट० ॥

पुष्पांजलिंदद्यादितिसप्तमावरणम् ॥ अथाष्टमा
वरणम् ॥ तद्वाहिःपूर्वाद्यष्टदिक्षु ॥ ॐ सोंसोमाय
नमः ॥ ॐ बुंबुधायनमः ॥ ॐ शुंशुक्रायनमः ॥
ॐ भौंभौमायनमः ॥ ॐ शंशनैश्चरायनमः ॥
ॐ रांराहवेनमः ॥ ॐ कैंकेतवेनमः ॥ मूलेन
अभीष्ट० ॥ पुष्पांजलिंदद्यादित्यष्टमावरणम् ॥
अथनवमं ॥ पूर्वाद्यष्टदिक्षु ॐ लंइंद्रायनमः ॥
ॐ रंअग्नयेनमः ॥ ॐयंयमायनमः॥ ॐ क्षंनिर्ऋ
तयेनमः॥ ॐ वंवरुणायनमः॥ ॐयंवायवेनमः॥
ॐ संसोमायनमः॥ ॐ ईंईशानायनमः॥ ॐ ब्र

ह्मणेनमः॥ ॐ अनंतायनमः॥ मूलेन अभीष्ट० ॥
पुष्पांजलिंदद्यादितिनवमावरणम्॥ अथदशमं॥
ॐ वंवज्रायनमः॥ ॐ शंशक्तयेनमः ॥ ॐ दंदं
डायनमः॥ ॐ खंखड्गायनमः॥ ॐ पंपाशायन
मः॥ ॐ गंगदायैनमः॥ ॐ त्रिंत्रिशूलायनमः ॥
ॐ चंचक्रायनमः॥ ॐ अंअंबुजायनमः ॥ मूले
नअभीष्ट० ॥ पुष्पांजलिं दद्यादितिदशमावर
णम् ॥ पुनःपंचोपचारैःसंपूज्यनीराजनंपुष्पांज २६
लिंदत्त्वायस्यस्मृत्येति पूजांसमर्प्य जपफलंदे
व्याःकरेसमर्प्यपुष्पांजलिंदत्त्वाक्षमाप्यस्वहृदि

उद्वास्यपुनर्ऋष्यादिन्यासं कृत्वानिर्माल्यंविसृ
जेदितिनित्यपूजापद्धतिःसमाप्ता॥ अथनैमित्ति
कमाह ॥ गुरुजन्मदिवसेस्वजन्मदिवसेजन्मन
क्षत्रेविद्याप्राप्तिदिवसेपूर्णायांव्यतीपातेवाविशेषं
पूजयेदितिनैमित्तिकम् ॥ अथपुरश्चरणविधिः॥
कर्तास्वशक्त्यागुरुंसंपूज्यतदनुज्ञयादेहशुद्ध्यर्थं
चांद्रायणंप्राजापत्यंवासमाचरेत् पुरश्चरणेतद्दि
वसेसुगंधसलिलैः स्नानंपूजाप्रदेशेचतुरस्रंचतुर्द्वा
रंमंडपंविधायहृष्टधीर्वाङ्नियमितो मिताहारो
जितेंद्रियः प्रातरारभ्यमध्याह्नंजपेत्एवंचतुर्वि

शतिलक्षंजपेत् ॥ तदुक्तम् ॥ उक्तलक्षविधाने
नकृत्वाश्रिया जितेन्द्रियाः ॥ क्षीरौदनंतिलंदूर्वा
क्षीरद्रुमसमिदद्रुमान् ॥ अष्टद्रव्येणचपृथक्सह
स्रात्रितयंहुनेत् ॥ मंत्रसिद्धये ॥ अन्यत्रापिजपद
शांशहोमः ॥ तद्दशांशेनतर्पणम् तद्दशांशेनमा
र्जनम् तद्दशांशेनब्राह्मणभोजनम् ॥ इतिपुरश्चर
णविधिः ॥ अथकाम्यमुच्यते ॥ विद्यार्थीवाग्भ
वाद्यांलक्ष्मीकामः श्रीबीजंवश्यार्थेकामबीजंस
र्वकामार्थेमायाबीजंआयुःकामार्थेमृत्युंजयचतु
रक्षरीसहितंजपेदितिजपविधिः ॥ तत्वसंख्या

सहस्राणिसमंत्रं जुहुयात्तिलैः ॥ सर्वपापविनिर्मु
क्तोदीर्घमायुश्चविंदति॥ आयुष्यंसाज्यहविषाके
वलेनाथसर्पिषा ॥ पर्वांकितैस्तिलैर्मंत्रीजुहुया
त्त्रिसहस्रकम् ॥ अरुणाक्षैस्त्रिमध्वाज्यैः प्रसूनै
र्ब्रह्मवृक्षजैः ॥ बहुनाकिमिहोक्तेनयथावत्साधुसा
धिता ॥ द्विजन्मनामियंविद्यासिद्धकामदुहास्मृ
ता ॥ इति गायत्रीपद्धतिः संपूर्णा ॥ ॥ ६॥ ॥

॥ अथगायत्र्युपनिषत् ॥

नमस्कृत्यभगवान् याज्ञवल्क्यःस्वयंपरिपृच्छ
तित्वंब्रूहिभगवन् गायत्र्याउत्पत्तिंश्रोतुमिच्छा

गा० मि ॥ ब्रह्मोवाच ॥ प्रणवेनव्याहृतयःप्रवर्तंतेतमस उ०
२८ स्तुपरंज्योतिःकःपुरुषःस्वयम् ॥ भूर्विष्णुरितिह २
ताःस्वांगुल्या मथयेत् मथ्यमानात्फेनोभवतिफे
नाद्बुद्बुदोभवति बुद्बुदादंडंभवति अंडवानात्माभ
वति आत्मनः आकाशोभवति आकाशाद्वायुर्भ
वति वायोरग्निर्भवति अग्नेरोंकारोभवति ॐका
राद्व्याहृतिर्भवति व्याहृत्यागायत्रीभवति गाय
त्र्याः सावित्रीभवतिसावित्र्याः सरस्वतीभवति २८
सरस्वत्यावेदाभवंति वेदेभ्योब्रह्माभवति ब्रह्म
णोलोकाभवंति तस्माल्लोकाः प्रवर्त्ततेचत्वारोवे

दाः सांगाःसोपनिषदाः सेतिहासास्ते सर्वेंगा
यच्याःप्रवर्त्तते यथाग्निर्देवानांब्राह्मणोमनुष्याणां
मेरुःशिखरिणां गंगानदीनां वसंतऋतूनां ब्र
ह्मप्रजापतीनामेवासौमुख्यः गायच्यागायत्री
छंदोभवति किंभूः किंभुवः किंस्वः किंमहः
किंजनः किंतपः किंसत्यं किंतत् किंसवितुः
किंवरेण्यं किंभर्गः किंदेवस्य किंधीमहि किं
धियः किंयः किंनः किंप्रचोदयात् भूरितिभू
र्लोकः भुवइत्यंतरिक्षलोकः स्वरितिस्वर्लोकः
महइतिमहर्लोकः जनइतिजनोलोकः तपइति

तपोलोकः सत्यमितिसत्यलोकः ॐ भूर्भुवः स्व
रोमितित्रैलोक्यमृतदसौतेजः यत्तेजसोग्निर्देवता
सवितुरित्यादित्यस्यवरेण्यमित्यन्नं अन्नमेवप्र
जापतिः भर्गइत्यापोवैभर्गः एतावत्सर्वादेवताः
देवस्यैंद्रोवैदेवयाहिवंतादिंद्रस्तस्मात्सर्वकृत पुरु
षोनामविष्णुःधीमहिकिमध्यात्मं तत्परमंपद
मित्यध्यात्मं योनइतिपृथिवीवैयोनःप्रचोदया
त् कामइमान्लोकान् प्रच्यवयन् योनृशंस्यो
स्तोप्यस्तत्परमोधर्मः इत्येषागायत्रीकिंगोत्रा
कत्यक्षराकतिपदाकतिकुक्षिः कतिशीर्षाणि सां

ख्यायनसगोत्रागायत्रीचतुर्विंशत्यक्षरात्रिपदा
षट्कुक्षिःसावित्रीकेशास्त्रयःपादाभवंति कास्याः
कुक्षिःकानिपंचशीर्षाणिऋग्वेदोस्याः प्रथमःपा
दोभवति यजुर्वेदोद्वितीयः सामवेदस्तृतीयः
पूर्वादिकप्रथमाकुक्षिर्भवति दक्षिणाद्वितीया प
श्चिमातृतीया उदीचीचतुर्थी ऊर्ध्वापंचमी अ
धराषष्ठी कुक्षिःव्याकरणमस्याः प्रथमंशीर्षंभव
ति शिक्षाद्वितीयं कल्पस्तृतीयांनिरुक्तंचतुर्थं
ज्योतिषामनयनंपंचमं किंलक्षणं किमुचेष्टितं
किमुदाहृतं किमक्षरं दैवत्यं लक्षणं मीमांसा

गा० अथर्ववेदोविचोष्टितम् छंदोविधिरित्युदाहृतम् उ०
३० कोवर्णः कः स्वरः श्वेतोवर्णः षट्स्वराणि इमा ३
न्यक्षराणि दैवतानिभवंति पूर्वाभवति गायत्री
मध्यमासावित्रीपश्चिमासंध्यासरस्वती । प्रातः
संध्यारक्तारक्तपद्मासनस्था रक्तांबरधरारक्तव
र्णा रक्तगंधानुलेपना चतुर्मुखा अष्टभुजा द्वि
नेत्रादंडाक्षमालाकमंडलुस्रुक्स्रुवधारिणी सर्वा
भरणभूषिता गायत्रीकौमारी ब्राह्मीहंसवाहिनी ३०
ऋग्वेदसहिता ब्रह्मदैवत्यात्रिपदागायत्रीषट्कु
क्षिः पंचशीर्षा अग्निमुखारुद्रशिखाविष्णुहृदयाब्र

ह्मकवचासांख्यायनसगोत्राभूर्लोकव्यापिनीअ
ग्निस्तत्त्वंउदात्तानुदात्तस्वरितस्वरमकारः आ
त्मज्ञानेविनियोगः ॥ इत्येषागायत्री ॥ मध्या
ह्नसंध्याश्वेताश्वेतपद्मासनस्था श्वेतांबरधराश्वे
तगंधानुलेपनापंचमुखीदशभुजात्रिनेत्राशूलाक्ष
मालाकमंडलुकपालधारिणी सर्वाभरणभूषिता
सावित्रीयुवतीमाहेश्वरीवृषभवाहिनी यजुर्वेदस
हितारुद्रदैवत्यात्रिपदासावित्रीषट्कुक्षिः पंचशी
र्षाअग्निमुखारुद्रशिखाब्रह्मकवचा भारद्वाजस
गोत्रा भुवर्लोकव्यापिनीवायुस्तत्वंउदात्तानुदा

गा० त्तस्वरितस्वरमुकारः श्वेतवर्णःआत्मज्ञानेविनि उ०
३१ योगः ॥ इत्येषासावित्री ॥ सायंसंध्याकृष्णाकृ ३
ष्णपद्मासनस्थाकृष्णांबरधराकृष्णवर्णा कृष्णगंधा
नुलेपनाकृष्णमाल्यांबरधराएकमुखी चतुर्भुजा
द्विनेत्राशंखचक्रगदापद्मधारिणी सर्वाभरणभू
षितासरस्वतीवृद्धावैष्णवीगरुडवाहिनीसामवेद
संहिताविष्णुदैवत्यात्रिपदाषट्कुक्षिः पंचशीर्षा
अग्निमुखाविष्णुहृदयारुद्रशिखाब्रह्मकवचा का ३१
श्यपसगोत्रास्वर्लोकव्यापिनीसूर्यस्तत्वंउदात्ता
नुदात्तस्वरितंमकारःकृष्णवर्णोमोक्षज्ञानेविनियो

गः ॥ इत्येषासरस्वती ॥ रक्तागायत्रीश्वेतासावि
त्रीकृष्णवर्णासरस्वती ॥ प्रणवोनित्ययुक्तश्चव्या
हृतीषुचसप्तसु ॥ सर्वैषामेवपापानांसंकरेसमुप
स्थिते ॥ दशशतंसमभ्यर्च्यगायत्रीपावनीमह
त् ॥ प्रल्हादोत्रिर्वसिष्ठश्चशुकः कण्वः पराशरः ॥
विश्वामित्रोमहातेजाः कपिलः शौनकोमहान् ॥
याज्ञवल्कयोभरद्वाजोजमदग्निस्तपोनिधिः ॥
गौतमोमुद्गलः श्रेष्ठोवेदव्यासश्चलोमशः ॥ अ
गस्त्यः कौशिकोवत्सः पुलस्त्योमांडुकस्तथा ॥
दुर्वासास्तपसाश्रेष्ठोनारदःकश्यपस्तथा ॥ उक्ता

गा० त्युक्तास्तथामध्याःप्रतिष्ठान्यासपूर्विका ॥ गा ३०
३२ यत्र्युष्णिगनुष्टुप्चबृहतीपंक्तिरेवच ॥ त्रिष्टुप्च ३
जगतीचैवतथातिजगतीमता ॥ शक्करीसातिपूर्वा
स्यादष्टयत्यष्टीतथैवच ॥ धृतिश्चातिधृतिश्चैवप्र
कृतिःकृतिराकृतिः ॥ विकृतिःसंकृतिश्चैवतथाति
कृतिरुत्कृतिः ॥ इत्येताश्छंदसांसंज्ञाःक्रमशोव
च्मिसांप्रतम् ॥ भूरितिछंदोभुवइतिछंदस्वरिति
छंदोभूर्भुवःस्वरोमितिदेवीगायत्री इत्येतानिछं ३२
दांसिप्रथममाग्नेयंद्वितीयंप्राजापत्यंतृतीयं सौ
म्यंचतुर्थमीशानंपंचममादित्यंषष्ठंबार्हस्पत्यंस

प्तमंपितृदैवत्यंअष्टमंभगदैवत्यंनवममार्यमंद
शमंसावित्रंएकादशंत्वाष्ट्रंद्वादशंपौष्णंत्रयोदश
मैन्द्राग्न्यंचतुर्दशंवायव्यंपंचदशंवामदैवत्यंषोड
शंमैत्रावरुणंसप्तदशंभ्रातृव्य (?) मष्टादशंवैश्व
देव्यंएकोनाविंशंवैष्णवंविंशंवासवंएकविंशंरौद्रं
द्वाविंशमाश्विनंत्रयोविंशं(?)चतुर्विंशंब्राह्मं दीर्घा
न्स्वरेणसंयुक्तान्बिन्दुनादसमन्वितान् ॥ व्याप
कान्विन्यसेत्पश्चाद्दशपंक्त्यक्षराणिच ॥ दुद्रुंपुस
इतिप्रत्यक्षबीजानि ॥ प्रल्हादिनीप्रभासत्यावि
श्वाभद्राविलासिनी ॥ प्रभावतीज याकांताशांता

उ०
गा० पद्मासरस्वती ॥ विद्रुमस्फाटिकाकारंपद्मरागसम
३३ प्रभम्॥इंद्रनीलमणिप्रख्यंमौक्तिकंकुंकुमप्रभम्॥ ३
अजनाभंचगांगेयंवैदूर्यंचंद्रसन्निभम् ॥ हारिद्रं
कृष्णदुग्धाभंरविकांतिसमंभवम् ॥ शुकपिच्छ
समाकारंक्रमेणपरिकल्पयेत्॥पृथिव्यापस्तथा
तेजोवायुराकाशएवच ॥ गंधोरसश्चरूपंचशब्दः
स्पर्शस्तथैवच ॥ घ्राणंजिह्वाचचक्षुश्चत्वक्छ्रोत्रंच
तथापरम् ॥ उपस्थपायुपादादिपाणिर्वागपिचक्र ३३
मात् ॥ मनोबुद्धिरहंकारमव्यक्तंचयथाक्रमं॥ सु
मुखंसंपुटंचैवविततंविस्तृतंतथा ॥ एकमुखंद्विमु

खंत्रिमुखंचचतुर्मुखम् ॥ पंचमुखंषण्मुखंचाधोमु
खंचैवव्यापकम् ॥ अंजलीकंततःप्रोक्तंमुद्रितंतु
त्रयोदशम् ॥ शकटंयमपाशंचग्रंथितंसंमुखोन्मु
खम् ॥ प्रलंबंमुष्टिकंचैवमत्स्यःकूर्मोवराहकम् ॥
सिंहाक्रांतंमहाक्रांतंमुद्गरंपल्लवंतथा ॥ एतामुद्रा
श्चतुर्विंशद्गायत्र्याःसुप्रतिष्ठिताः ॥ ॐ मूर्ध्निसंघा
तेब्रह्माविष्णुर्ललाटेरुद्रोभ्रूमध्ये चक्षुषोश्चंद्रादि
त्यौकर्णयोःशुक्रबृहस्पतीनासिकेवायुदैवत्यंप्र
९ भातंदोषाउभेसंध्येमुखमाग्निर्जिह्वासरस्वतीग्री
वास्वाध्यायास्तनयोर्वसवःबाहोर्मरुतःहृदयंप

र्जन्यंआकाशमपरंनाभिरंतरिक्षंकटिरिंद्रिया
णिजघनंप्राजापत्यंकैलासमलयौऊरूविश्वेदेवा
जानुभ्यांजान्वोःकुशिकौजंघयोरयनद्वयमखु
राःपितरःपादौपृथिवीवनस्पतिःगुल्फौरोमाणि
मुहूर्त्तास्तेविग्रहाःकेतुमासाऋतवःसंध्याकालत्र
यमाच्छादनंसंवत्सरोनिमिषः अहोरात्रादित्य
श्चंद्रमाः सहस्रपरमांदेवींशतमध्यांदशापराम्॥
सहस्रनेत्रींदेवींगायत्रींशरणमहंप्रपद्ये ॥ तत्सवि ३४
तुर्वरदायनमः तत्प्रातरादित्यायनमः॥ सायम
धीयानोदिवसकृतंपापंनाशयति प्रातरधीयानो

रात्रिकृतंपापंनाशयतितत्सायंप्रातःप्रयुंजानोअ
पापोभवतियइदंगायत्रीहृदयंब्राह्मणःप्रयतःपठे
त्चत्वारोवेदाअधीताभवंति सर्वेषुतीर्थेषुस्नातो
भवतिसर्वैर्देवैर्ज्ञातोभवतिसर्वप्रतिप्रत्यूहात्पूतो
भवतिअपेयपानात्पूतोभवतिअभक्ष्यभक्षणात्
पूतोभवतिअलेह्यलेहात्पूतोभवतिअचोष्यचोष
णात्पूतो० ॥ सुरापानात्पूतो० ॥ सुवर्णस्ते
यात्पूतो० ॥ पंक्तिभेदनात्पूतो० ॥ पतितसंभा
षणात्पूतो० ॥ अनृतवचनात्पूतो० ॥ गुरुतल्प
गमनात्पूतो० ॥ अगम्यागमनात्पूतो० ॥ वृष

लीगमनात्पूतो० ॥ ब्रह्महत्यायाःपूतो० ॥ भ्रूण
हत्यायाःपूतो० ॥ वीरहत्यायाःपूतो० ॥ अब्रह्म
चारीसुब्रह्मचारीभवति ॥ अनेनहृदयाद्धीतेन
क्रतुशतेनेष्टंभवतिषष्टिसहस्रगायत्रीजप्यानिभ
वंति ॥ अष्टौब्राह्मणान्ग्राहयेत् अर्थसिद्धिर्भव
ति यइदंगायत्रीहृदयंब्राह्मणःप्रयतःपठेत्सर्वपा
पैःप्रमुच्यते ब्रह्मलोकेमहीयतेब्रह्मलोकेमहीयत
इति ॥ इतिगायत्र्युपनिषत्संपूर्णा ॥

॥ अथगायत्रीतत्वप्रारम्भः ॥

॥ श्रीगणेशायनमः ॥ ॥ श्रीगायत्र्यैनमः ॥

श्रीगायत्रीतत्वमालामंत्रस्यविश्वामित्रऋषिः ॥
अनुष्टुप्छन्दः॥परमात्मादेवता॥हलोबीजानिस्व
राःशक्तयः॥ अव्यक्तंकीलकं। ममसमस्तपापक्ष
यार्थेगायत्रीतत्त्वपाठेविनियोगः॥ चतुर्विंशतित
त्वानांयदेकंतत्वमुत्तमम् ॥ अनुपाधिपरंब्रह्मत
त्परंज्योतिरोमिति ॥ योवेदादौस्वरःप्रोक्तोवेदां
तेचप्रतिष्ठितः ॥ तस्यप्रकृतिलीनस्यतत्परंज्यो
तिरोमिति ॥ तत्सदादिपदैर्वाच्यंपरमंपदमव्य
यम् ॥ अभेदत्वंपदार्थस्यतत्परंज्योतिरोमिति॥
॥ ३ ॥ यस्यमायांशभागेनजगदुत्पद्यतेऽखिल

म्॥ तस्य सर्वोत्तमंरूपमरूपस्याभिधीमहि॥४॥
यंनपश्यंतिपरमंपश्यंतोपिदिवौकसः ॥ तंभूता
निलदेवंतुसुपर्णमुपधावताम्॥ ५॥ यदंशःप्रेरि
तोजंतुःकर्मपाशनियंत्रितः॥ आजन्मकृतपापा
नामपहंतुंदिवौकसः॥ ६ ॥ इदंमहामुनिप्रोक्तंगा
यत्रीतत्वमुत्तमम् ॥ यःपठेत्परयाभक्त्यासयाति
परमांगतिं ॥ ७ ॥ सर्ववेदपुराणेषुसांगोपांगेषुय
त्फलम्॥ सकृदस्यजपादेवतत्फलंप्राप्नुयान्नरः॥
॥ ८ ॥अभक्ष्यभक्षणात्पूतोभवति॥ अगम्यागम
नात्पूतोभवति॥सर्वपापेभ्यःपूतोभवति॥ प्रातर

धीयानोरात्रिकृतंपापंनाशयति॥सायमधीयानो
दिवसकृतंपापंनाशयति ॥ मध्यंदिनमुपयुंजानो
ऽसत्प्रतिग्रहादिनामुक्तोभवति ॥ अनुपूर्वंपुरुषा
पुरुषमाभिवदंति ॥ यंयंकाममभिध्यायतितत्तदे
वाप्नोतिपुत्रपौत्रान्कीर्तिसौभाग्यांश्चोपलभते ॥
सर्वभूतात्ममित्रोदेहांते तद्विशिष्टोगायत्रीपरमं
पदमवाप्नोति ॥ इतिश्रीवेदसारेगायत्रीतत्वंसंपू
र्णम् ॥

॥ अथगायत्रीकवचप्रारम्भः ॥

॥ श्रीगणेशायनमः॥ ॥ याज्ञवल्क्यउवाच ॥

स्वामिन्सर्वजगन्नाथसंशयोऽस्तिमहान्मम॥चतुः
षष्टिकलानांचपातकानांचतद्वद ॥ १ ॥ मुच्यते
केनपुण्येनब्रह्मरूपंकथंभवेत् ॥ देहश्चदेवतारूपं
मंत्ररूपंविशेषतः ॥ २ ॥क्रमतःश्रोतुमिच्छामि
कवचंविधिपूर्वकं ॥ ब्रह्मोवाच ॥ गायत्र्याःकवच
स्यास्यब्रह्माविष्णुःशिवोऋषिः॥ ३ ॥ ऋग्यजुःसा
माथर्वाणिछंदांसिपरिकीर्तिताः॥ परब्रह्मस्वरूपा
सागायत्रीदेवतास्मृता ॥ ४ ॥ रक्षाहीनंतुयत्स्था
नंकवचेनविनाकृतं ॥ सर्वंसर्वत्रसंरक्षेत्सर्वांगं
भुवनेश्वरी ॥ ५ ॥ बीजंभर्गश्चयुक्तिश्चधियःकील

कमेवच ॥ पुरुषार्थोविनियोगोयोनश्चपरिकीर्ति
तः ॥ ६ ॥ऋषिंमूर्ध्निन्यसेत्पूर्वंमुखेछंदउदीरितं ॥
देवताहृदिविन्यस्यगुह्येबीजंनियोजयेत् ॥७॥ श
क्तिंपादौतुविन्यस्यनाभौ तुकीलकंन्यसेत् ॥ द्वा
त्रिंशतिर्महाविद्यासांख्यायनसगोत्रजा ॥ ८ ॥द्वा
दशलक्षसंयुक्ताविनियोगःपृथक्पृथक् ॥ एवंन्या
साविधिंकृत्वाकरांगंविधिपूर्वकं ॥ ९ ॥ व्याहृति
त्रयमुच्चार्यअनुलोमविलोमतः ॥ चतुरक्षरसंयु
क्तंकरांगन्यासमाचरेत् ॥ १० ॥ आवाहनादिभे
दंचदशमुद्राःप्रदर्शयेत् ॥ सापातुवरदादेवीअंग

प्रत्यंगसंगमे ॥ ११ ॥ ध्यानमुद्रांनमस्कारंगुरु
मंत्रंतथैवच ॥ संयोगमात्मासिद्धिश्चषड्विधांकिं
विचारयेत् ॥ १२ ॥ अस्यश्रीगायत्रीकवचस्य
ब्रह्माविष्णुरुद्राऋषयः ऋग्यजुःसामाथर्वाणिच्छं
दांसिपरब्रह्मस्वरूपिणीगायत्रीदेवताभूःबीजंभु
वःशक्तिःस्वाहाकीलकंश्रीगायत्रीप्रीत्यर्थंजपेवि
नियोगः ॥ वर्णास्त्रांकुंडिकाहस्तांशुद्धनिर्मल
ज्योतिषीं ॥ सर्वतत्वमयींवन्देगायत्रींवेदमातरं ॥ ३८
॥ १ ॥ अथध्यानम् ॥ मुक्ताविद्रुमहेमनीलधवल
च्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटां त

त्वार्थवर्णात्मिकां ॥ गायत्रींवरदाभयांकुशक
शांश्शूलंकपालंगुणंशंखंचक्रमथारविंदयुगलं ह
स्तैर्वहंतींभजे ॥ १ ॥ ॐ गायत्रीपूर्वतःपातुसावि
त्रीपातुदक्षिणे ॥ ब्रह्मविद्याचमेपश्चादुत्तरेमांसर
स्वती ॥१॥ पावकींमेदिशंरक्षेत्पावकोज्ज्वलशा
लिनी ॥ यातुधानींदिशंरक्षेद्यातुधानगणार्दिनी॥
॥ २ ॥ पावमानींदिशंरक्षेत्पवमानविलासिनी ॥
दिशंरौद्रीमवतुमेरुद्राणीरुद्ररूपिणी ॥ ३ ॥ ऊ
र्ध्वंब्रह्माणीमेरक्षेदधस्ताद्वैष्णवीतथा ॥ एवंदश
दिशोरक्षेत्सर्वतोभुवनेश्वरी ॥४॥ ब्रह्मास्त्रस्मरणा

देववाचांसिद्धिःप्रजायते ॥ ब्रह्मदण्डश्चमेपातु
सर्वशस्त्रास्त्रभक्षकः ॥ ५ ॥ ब्रह्मशीर्षस्तथापातुश
त्रूणांवधकारकः ॥ सप्तव्याहृतयःपांतुसप्तदाबिं
दुसंयुतः ॥६॥ वेदमाताचमांपातुसरहस्यासदैव
ता ॥ देवीसूक्तंसदापातुसहस्राक्षरदेवता ॥ ७ ॥
चतुःषष्टिकलाविद्यादिव्याद्यापातुदेवता ॥ बीज
शक्तिश्चमेपातुपातुविक्रमदेवता ॥ ८ तत्पदंपा
तुमेपादौजंघेमेसवितुःपदम् ॥ वरेण्यंकटिदेशं
तुनाभिंभर्गस्तथैवच ॥ ९ ॥ देवस्यमेतुहृदयंधी
महीतिगलंतथा ॥ धियोमेपातुजिह्वायांयःपदं

पातुलोचने ॥ १० ॥ ललाटेनःपदंपातुमूर्द्धानंमे
प्रचोदयात् ॥ तद्वर्णःपातुमूर्द्धानंसकारःपातुभा
लकम् ॥११॥ चक्षुषीमेविकारस्तुश्रोत्रंरक्षेत्तुका
रकः ॥ नासापुटेवकारोमेरेकारस्तुकपोलयोः ॥
॥१२॥ णिकारस्त्वधरोष्ठेचयकारस्त्वधरोष्ठके ॥
आस्यमध्येमकारस्तुगोंकारस्तुकपोलयोः १३॥
देकारःकंठदेशेचवकारःस्कंधदेशयोः ॥ स्यका
रोदक्षिणंहस्तंधीकारोवामहस्तके ॥ १४ ॥ म
कारोहृदयंरक्षेद्धिकारोजठरंतथा ॥ धिकारोना
भिदेशंतुयोकारस्तुकटिद्वयम् ॥१५॥ गुह्यंरक्षतु

गा० योकारऊरूमेनःपदाक्षरं ॥ प्रकारोजानुनीरक्षे क०
४० च्छोकारोजंघदेशयोः॥ १६ ॥ दकारोगुल्फदेशं ५
तुयात्कारःपादयुग्मकम् ॥ जातवेदेतिगायत्री
त्र्यंबकेतिदशाक्षरा॥ १७ ॥ सर्वतःसर्वदापातु
आपोज्योतीतिषोडशी ॥ इदंतुकवचंदिव्यंबा
धाशतविनाशकम्॥ १८॥ चतुःषष्टिकलाविद्या
सकलैश्वर्य्यसिद्धिदम्॥ जपारंभेचहृदयंजपांते
कवचंपठेत्॥ १९॥ स्त्रीगोब्राह्मणमित्रादिद्रोहा ४०
द्याखिलपातकैः॥ मुच्यतेसर्वपापेभ्यःपरंब्रह्माधि
गच्छति ॥ २०॥ पुष्पांजलिंचगायत्र्यामूलेनैव

पठेत्सकृत् ॥ शतसाहस्रवर्षाणांपूजायाःफलमा
प्नुयात् ॥ २१ ॥ भूर्जपत्रेलिखित्वैतत्स्वकंठेधार
येद्यदि ॥ शिखायांदक्षिणेबाहौकंठेवाधारयेद्बु
धः ॥ २२ ॥ त्रैलोक्यंक्षोभयेत्सर्वंत्रैलोक्यंदहति
क्षणात् ॥ पुत्रवान्धनवाञ्छ्रीमान्नानाविद्यानिधि
र्भवेत् ॥ २३ ॥ ब्रह्मास्त्रादीनिसर्वाणितदंगस्पर्श
नात्ततः ॥ भवंतितस्यतुल्यानिकिमन्यत्कथया
मिते ॥ २४ ॥ अभिमंत्रितगायत्रीकवचं मानसं
पठेत् ॥ तज्जलंपिबतोनित्यंपुरश्चर्य्याफलंभवेत्
॥ २५ ॥ लघुसामान्यकंमंत्रंमहामंत्रंतथैवच ॥यो

गा० ४१

वेत्तिधारणांयुञ्जञ्जीवन्मुक्तःसउच्यते ॥ २६ ॥ क०
सप्तव्याहृतिविप्रेंद्रसप्तावस्थाःप्रकीर्तिताः ॥ सप्त ५
जीवशतानित्यंव्याहृतीअग्निरूपिणी ॥ २७ ॥ प्र
णवेनित्ययुक्तस्यव्याहृतीषुचसप्तसु ॥ सर्वेषामे
वपापानांसंकरेसमुपस्थिते ॥ २८ ॥ शतंसहस्रम
भ्यर्च्यंगायत्रीपावनंमहत् ॥ दशशतमष्टोत्तरश
तगायत्रीपावनंमहत् ॥ २९ ॥ भक्तिभाजोभवे
द्विप्रःसंध्याकर्मसमाचरेत् ॥ कालेकालेषुकर्त्त ४१
व्यंसिद्धिर्भवतिनान्यथा ॥ ३० ॥ प्रणवंपूर्वमुद्धृ
त्यभूर्भुवःस्वस्तथैवच ॥ तूर्यंसहैवगायत्रीजपए

वमुदाहृतम् ॥ ३१ ॥ तुरीयपादमुत्सृज्यगाय
त्रींचजपेद्द्विजः ॥ समूढोनरकंयातिकालसूत्रम
धोगतिः ॥३२ ॥ मंत्रादौजननंप्रोक्तंमंत्रांतेमृतसू
त्रकम् ॥ उभयोर्दोषनिर्मुक्तंगायत्रीसफलाभवे
त् ॥ ३३ ॥ मंत्रादौपाशबीजंचमंत्रांतेकुशबीज
कम्॥ मंत्रमध्येतुयामायागायत्रीसफलाभवेत्॥
॥३४॥ वाचिकस्त्वहमेवस्यादुपांशुशतमुच्यते॥
सहस्रंमानसंप्रोक्तंत्रिविधंजपलक्षणम् ॥ ३५ ॥
अक्षमालांचमुद्रांचगुरोरापिनदर्शयेत् ॥ जपंचा
क्षस्वरूपेणानामिकामध्यपर्वणी ॥ ३६ ॥ अना

गा० मामध्ययाहीनाकनिष्ठादिक्रमेणतु ॥ तर्ज्जनीमू क०
४२ लपर्य्यंतंगायत्रीजपलक्षणम् ॥ ३७ ॥पर्वभिस्तु ६
जपेदेवमन्यत्रानियमंस्मृतम् ॥ गायत्रीवेदमूल
त्वाद्वेदःपर्वसुगीयते ॥ ३८॥ दशभिर्ज्जन्मजनि
तंशतेनैवपराकृतम् ॥ त्रियुगंतुसहस्राणिगायत्री
हंतिकिल्बिषम् ॥ ३९ ॥ प्रातःकालेषुकर्तव्यांसि
द्धिंविप्रोयइच्छति ॥ नादालयेसमाधिश्चसंध्या
यांसमुपासते ॥ ४० ॥ अंगुल्यग्रेणयज्जप्तंयज्जप्तं ४२
मेरुलंघने ॥ असंख्ययाचयज्जप्तंतज्जप्तंनिःफलं
भवेत् ॥ ४१ ॥ विनावस्त्रंप्रकुर्वीतगायत्रीनिःफ

लाभवेत् ॥ वक्त्रपुच्छंनजानातिवृथातस्यपरिश्र
मः ॥ ४२ ॥ गायत्रींतुपरित्यज्य अन्यमंत्रमुपा
सते ॥ सिद्धान्नंचपरित्यज्यभिक्षामटतिदुर्मतिः
॥ ४३ ॥ ऋषिच्छंदोदेवताख्याबीजशक्तिश्चकी
लकम् ॥ नियोगंनचजानाति गायत्रीनिःफलाभ
वेत् ॥ ४४ ॥ वर्णमुद्राध्यानपदमावाहनाविस
र्जनम् ॥ दीपंचक्रंनजानातिगायत्रीनिःफलाभ
वेत् ॥ ४५ ॥ शक्तिन्यासस्तथास्थानंमंत्रसंबोध
नंपरम् ॥ त्रिविधंयोनजानातिगायत्रीनिःफला
भवेत् ॥ ४६ ॥ पंचोपचारकांश्चैवहोमद्रव्यंतथै

गा०	वच ॥ पंचांगंचविनानित्यंगायत्रीनिःफलाभवे
४३	त् ॥ ४७ ॥ मंत्रसिद्धिर्भवेज्जातुविश्वामित्रेणभाषि
तम् ॥ व्यासोवाचस्पतिर्जीवस्तुतादेवीतपःस्मृ
तौ ॥ ४८ ॥ सहस्रजप्त्वासादेवीह्युपपातकनाशि
नी ॥ लक्षजाप्येतथातन्महापातकनाशिनी ॥
कोटिजाप्येनराजेन्द्रयदिच्छतितदाप्नुयात् ॥
॥ ४९ ॥ नदेयंपराशिष्येभ्योह्यभक्तेभ्योविशेष
तः ॥ शिष्येभ्योभक्तियुक्तेभ्योह्यन्यथामृत्युमा
प्नुयात् ॥ ५० ॥ इतिश्रीमद्वशिष्ठसंहितायांगा
यत्रीकवचंसम्पूर्णम् ॥

क०
६
४३

॥ अथ गायत्रीपंजरस्तोत्रम् ॥

भगवंतंदेवदेवंब्रह्माणंपरमेष्ठिनम् ॥ विधातारंवि
श्वसृजंपद्मयोनिंप्रजापतिम् ॥ १ ॥ शुद्धस्फटि
कसंकाशंमहेन्द्रशिखरोपमम् ॥ बद्धपिंगजटा
जूटंतडित्कनककुंडलम् ॥ २ ॥ शरच्चंद्राभवदनं
स्फुरदिन्दीवरेक्षणम् ॥ हिरण्मयंविश्वरूपमुपवी
ताजिनावृतम् ॥ ३ ॥ मौक्तिकाभाक्षवलयस्तंत्री
लयसमान्वितः ॥ कर्पूरोद्धूलिततनुःस्रष्टुर्नयनवर्द्ध
नम् ॥ ४ ॥ विनयेनोपसंगम्यशिरसाप्रणिपत्य
च ॥ नारदः परिपप्रच्छदेवर्षिगणमध्यगः ॥ ५ ॥

गा० नारदउवाच ॥ भगवन्देवदेवेशसर्वज्ञकरुणानि पं०
४४ धे ॥ श्रोतुमिच्छामिप्रश्नेनभोगमोक्षैकसाधनम् ६
॥ ६ ॥ ऐश्वर्यस्यसमग्रस्यफलदंद्वंद्ववर्जितम् ॥
ब्रह्महत्यादिपापघ्नंपापाद्यरिभयापहम् ॥ ७ ॥ य
देकंनिष्कलंसूक्ष्मंनिरंजनमनामयम् ॥ यत्तेप्रि
यतमंलोकेतन्मेब्रूहिपितर्मम ॥ ८ ॥ ब्रह्मोवाच ॥
शृणुनारदवक्ष्यामिब्रह्ममूलंसनातनम् ॥ सृष्ट्या
दौमन्मुखेक्षिप्तंदेवदेवेनविष्णुना ॥ ९ ॥ प्रपंचबी ४४
जमित्याहुरुत्पत्तिस्थितिहेतुकम् ॥ पुरामयातु
कथितंकश्यपायसुधीमते ॥ १० ॥ सावित्रीपंज

रंनामरहस्यंनिगमत्रये ॥ ऋष्यादिकंचदिग्वर्ण
सांगावरणकंक्रमात् ॥ ११ ॥ वाहनायुधमंत्रास्त्रं
मूर्तिध्यानसमन्वितम् ॥ स्तोत्रंशृणुप्रवक्ष्यामि
तवस्नेहाच्चनारद ॥ १२ ॥ ब्रह्मनिष्ठायदेयंस्या
ददेयंयस्यकस्यचित्॥ आचम्यनियतःपश्चादा
त्मध्यानपुरःसरम् ॥ १३ ॥ ओंमित्यादौविचिं
त्याथव्योमहेमाब्जसंस्थितम् ॥ धर्मकंदगतज्ञा
नमैश्वर्याष्टदलान्वितम् ॥ १४ ॥ वैराग्यकर्णिका
सीनांप्रणवग्रहमध्यगाम् ॥ब्रह्मवेदीसमायुक्तांचै
तन्यपुरमध्यगाम् ॥ १५॥ तत्त्वहंससमाकीर्णां

गा० शब्दपीठेसुसंस्थिताम्॥ नादाबिंदुकलातीतांगोपु पं०
४५ रैरुपशोभितां॥ १६ ॥ विद्याविद्यामृतत्वादिप्रका ६
रैरभिसंवृताम् ॥ निगमार्गलसंछन्नांनिर्गुणद्वार
वाटिकाम्॥ १७ ॥ चतुर्वर्गफलोपेतांमहाकल्प
वनैर्वृताम्॥ सांद्रानंदसुधासिंधुनिगमद्वारवाटि
काम्॥ १८ ॥ ध्यानधारणयोगादितृणगुल्मल
तावृताम् ॥ सदसच्चित्स्वरूपाख्यमृगपाक्षिसमा
कुलाम् ॥ विद्याविद्याविचारत्वाल्लोकालोकाच ४६
लावृताम्॥ १९ ॥ अविकारसमाश्लिष्टनिजध्या
नगुणावृताम् ॥ पंचीकरणपंचोत्थभूततत्त्वानिवे

दिताम् ॥ २० ॥ वेदोपनिषदर्थाख्यदेवर्षिमणसे
विताम् ॥ इतिहासग्रहगणैःसदारैरभिवंदिताम्
॥ २१ ॥ गाथाप्सरोभिर्यक्षैश्चगणाकिंनरसेविता
म् ॥ नारसिंहपुराणाख्यैःपुरुषैःकल्पचारणैः ॥
॥२२॥ कृतगानविनोदादिकथालापनतत्पराम्॥
तदित्यवाङ्मनोगम्यतेजोरूपधरांपराम् ॥२३॥
जगतःप्रसवित्रींतांसवितुःसृष्टिकारिणीं ॥ वरेण्य
मित्यन्नमयींपुरुषार्थफलप्रदाम् ॥ २४ ॥ अविद्या
वर्णवर्ज्यांचतेजोवद्गर्भसंज्ञिकाम् ॥ देवस्यसच्चि
दानंदपरब्रह्मरसात्मिकाम् ॥ २५ ॥ धीमह्यहंसवै

गा० तद्ब्रह्माद्वैतस्वरूपिणीम् ॥ धियोयोनस्तुसवि पं०
४६ ताप्रचोदयादुपासितां ॥ २६ ॥ परोसौसावितासा ६
क्षादेनोनिर्हरणायच ॥ परोरजसइत्यादिपरंब्रह्म
सनातनम् ॥ २७ ॥ आपोज्योतिरितिद्वाभ्यांपां
चभौतिकसंज्ञकम् ॥ रसोमृतंब्रह्मपदैस्तांनित्यां
तपिनींपराम् ॥ २८ ॥ भूर्भुवःसुवरित्येतैर्निगम
त्वप्रकाशिकाम् ॥ महर्जनस्तपःसत्यलोकोपरि
सुसंस्थिताम् ॥ २९ ॥ तादृगस्याविराड्रूपरह ४६
स्यंप्रवदाम्यहम् ॥ व्योमकेशालकाकाशद्योकि
रीटविराजिताम् ॥ ३० ॥ मेघभ्रुकुटिमाक्रांतवि

धिविष्णुशिवार्चिताम् ॥ गुरुभार्गवकर्णांतांसोम
सूर्याग्निलोचनाम् ॥ ३१ ॥ इलापिंगलसूक्ष्माभ्यां
वामनासापुटान्विताम् ॥ संध्याद्विरोष्ठपुटितां
लसद्वाग्भूपजिव्हिकां ॥ ३२ ॥ संध्यासौद्युमणेः
कंठलसद्वाहुसमन्विताम् ॥ पर्ज्जन्यहृदयासक्त
वसुसुस्तनमंडलाम् ॥ ३३ ॥ आकाशोदरवित्रस्त
नाभ्यवांतरदेशिकाम् ॥ प्राजापत्याख्यजघनां
कटींद्राणीतिसंज्ञिकाम् ॥ ३४ ॥ ऊरूमलयमेरुभ्यां
शोभमानाऽसुरद्विषम् ॥ जानुर्नीजह्नुकुशिकवै
श्वदेवसदाभुजाम् ॥ ३५ ॥ अयनद्वयजंघाद्यखु

गा० राद्यापितृसंज्ञिकाम् ॥ पदांघ्रिनखरोमाणिभूत पं०
४७ लद्रुमलांछितां ॥३६॥ ग्रहराश्यृक्षदेवर्षिमूर्तिंचप ६
रसंज्ञिकां ॥ तिथिमासर्तुवर्षाख्यसुकेतुनिमिषा
त्मिकाम् ॥ ३७ ॥ अहोरात्रार्द्धमासाख्यांसू
र्यचंद्रमसात्मिकाम् ॥ मायाकल्पितवैचित्र्य
संध्याच्छादनसंवृताम् ॥ ३८ ॥ ज्वलत्कालान
लप्रख्यांतडित्कोटिसमप्रभाम् ॥ कोटिसूर्यप्र
तीकाशांचंद्रकोटिसुशीतलाम् ॥ ३९ ॥सुधामं ४७
डलमध्यस्थांसांद्रानंदाऽमृतात्मिकाम् ॥ वाग
तीतांमनोरम्यांवरदांवेदमातरम् ॥ ४० ॥ चरा

चरमयींनित्यांब्रह्माक्षरसमन्विताम् ॥ ध्यात्वा
स्वात्मानिभेदेनब्रह्मपंजरमारभे ॥ ४१ ॥ पंजर
स्यऋषिश्चाहंछंदोविकृतिरुच्यते ॥ देवताचप
रोहंसःपरब्रह्माधिदेवता ॥ ४२ ॥प्रणवोबीजश
क्तिःस्यादोंकीलकमुदाहृतम् ॥ तत्तत्वं धीमहि
क्षेत्रंधियोऽन्नंयःपरंपदम् ॥ ४३ ॥ मंत्रमापोज्यो
तिरितियोनिर्हंसःसवेधकम् ॥ विनियोगस्तुसि
द्ध्यर्थंपुरुषार्थचतुष्टये ॥ ४४ ॥ ततस्तैरंगषट्कं
स्यात्तैरेवव्यापकत्रयम्॥ पूर्वोक्तदेवतांध्यायेत्सा
कारगुणसंयुताम् ॥ ४५ ॥ पंचवक्त्रांदशभुजांत्रि

गा० पंचनयनैर्युताम् ॥ मुक्ताविद्रुमसौवर्णासितशुभ्रस पं०
४८ माननाम् ॥ ४६ ॥ वाणींपरांरमांमायांचामरैर्द ६
र्पणैर्युताम् ॥ षडंगदेवतामंत्रैरूपाद्यवयवात्मि
काम् ॥ ४७ ॥ मृगेंद्रवृषपक्षींद्रमृगहंसासनास्थि
ताम् ॥ अर्द्धेन्दुबद्धमुकुटकिरीटमणिकुंडलाम् ॥
॥ ४८ ॥ रत्नताटंकमांगल्यपरग्रैवेयनूपुराम् ॥
अंगुलीयककेयूरकंकणौघैरलंकृतां ॥ ४९ ॥ दिव्य
स्रग्वस्त्रसंछन्नरविमंडलमध्यगां ॥ वराभयाब्जयु ४८
गुलांशंखचक्रगदांकुशान् ॥ ५० ॥ शुभ्रंकपालंद
धतींवहंतीमक्षमालिकाम् ॥ गायत्रींवरदांदेवीं

सावित्रींवेदमातरम् ॥ ५१ ॥ आदित्यपथगामि
न्यास्स्मरेद्ब्रह्मस्वरूपिणीं ॥ विचित्रमंत्रजननीं
स्मरेद्विद्यांसरस्वतीं ॥ ५२ ॥ त्रिपदाऋङ्मयीपू
र्वामुखीब्रह्मास्त्रसंज्ञिका ॥ चतुर्विंशतितत्त्वाख्या
पातुप्राचींदिशंमम ॥ ५३ ॥ चतुष्पादयजुर्ब्रह्मद
डाख्यापातुदक्षिणाम् ॥ षट्त्रिंशत्तत्वयुक्तासा
पातुमेदक्षिणांदिशं ॥ ५४ ॥ प्रत्यङ्मुखीपंचपदी
पंचाशत्तत्वरूपिणी ॥ पातुप्रतीचीमनिशंसामब्र
ह्मशिरोऽङ्किता॥५५॥सौम्याब्रह्मस्वरूपाख्यासा
थर्वाङ्गिरसात्मिका ॥ उदीचींषट्पदापातुचतुःष

गा० ष्टिकलात्मिका ॥५६॥ पंचाशत्तत्वरचिताभंवपा पं०
४१ दाशताक्षरी ॥ व्योमाख्यापातुमेचोर्ध्वांदिशंवे ६
दांगसंस्थिता ॥ ५७ ॥ विद्युन्निभाब्रह्मसंज्ञामृग
रूढाचतुर्भुजा ॥ चापेषुचर्मासिधरापातुमेपाव
कींदिशम् ॥ ५८ ॥ ब्राह्मीकुमारीगायत्रीरक्तांगी
हंसवाहिनी ॥ बिभ्रत्कमंडलवक्षस्रक्स्रुवान्मेपा
तुनैर्ऋतीं ॥ ५९ ॥ चतुर्भुजावेदमाताशुक्लांगीवृष
वाहिनी ॥ वराभयकपालाक्षस्राग्विणीपातुवारु ४१
णीम् ॥ ६० ॥ श्यामासरस्वतीवृद्धावैष्णवीगरु

१ एकादशपदामित्यर्थः ।

ङासना ॥ शंखाराब्जाभयकरा पातु शैवीं दिशं
मम ॥ ६१ ॥ चतुर्भुजा वेदमाता गौरांगी सिंहवाह
ना ॥ वराभयाब्जयुगुलैर्भुजैः पात्वधरां दिशम् ॥
॥ ६२ ॥ तत्तत्पार्श्वस्थितास्वस्ववाहनायुधभूष
णाः ॥ स्वस्वदिक्षुस्थिताः पांतु ग्रहशक्त्यंगदेव
ताः ॥ ६३ ॥ मंत्राधिदेवतारूपा मुद्राधिष्ठानदेव
ताः ॥ व्यापकत्वेन पात्वस्मानापदृत्तलमस्तकी
॥ ६४ ॥ तत्पदं मो शिरः पातु भालं मे सवितुः पदम् ॥
वरेण्यं मे दृशौ पातु श्रुतीं भर्गः सदा मम ॥ ६५ ॥ घ्रा
णं देवस्य मे पातु पातु धीमहि मे मुखम् ॥ जिह्वां म

गा० माधियःपातुकंठेमेपातुयःपदम् ॥६६॥ नः पदंपा पं०
५० तुमेस्कंधौभुजौपातुप्रचोदयात् ॥ करौमेचपरः ६
पातुपादौमेरजसोऽवतु ॥६७॥ ओंमनाभिंसदा
पातुकटिंमेपातुमेसदा ॥ ओमापःसक्थिनीपा
तुगुह्यंज्योतिःसदामम ॥ ६८॥ ऊरूममरसःपा
तुजानुनीअमृतंमम ॥जंघेब्रह्मपदंपातुगुल्फौभूः
पातुमेसदा ॥ ६९॥ पादौममभुवःपातुस्सुवःपात्व
खिलंवपुः ॥ रोमाणिमेमहःपातुरोमकंपातुमेज ५०
नः ॥७०॥ प्राणश्चधातुस्तत्वानितदीशःपातुमे
तपः ॥ सत्यंपातुममायूंषिहंसाद्वंद्विंचपातुमे ॥

॥ ७१ ॥ शुचिषत्पातु मे शुक्रं वसु पातु श्रियं मम ॥
मतिं पात्वंतरिक्षेसद्धोतादानं च पातु मे ॥ ७२ ॥
वेदिषत्पातु मे विद्यामतिथिः पातु मे ग्रहम् ॥ धर्मं दु
रोणसत्पातु नृषत्पातु सुतान्मम ॥ ७३ ॥ वरसत्पा
तु मे मायामृतसत्पातु मे सुतान् ॥ व्योमसत्पा
तु मे बंधून्भ्रातृनब्जश्च पातु मे ॥ ७४ ॥ पशून्मे
पातु गोजाश्च ऋतजाः पातु मे भुवम् ॥ सर्वं मे अद्रि
जा पातु यानं मे पात्वृतं सदा ॥ ७५ ॥ अनुक्रमथ य
त्स्थानं शरीरेंतर्बहिश्च यत् ॥ तत्सर्वं पातु मे नित्यं
हंसः सोहमहर्निशम् ॥ ७६ ॥ इदं तु कथितं सम्यङ्

गा० मयाते ब्रह्मपंजरम् ॥ संध्ययोःप्रत्यहंभक्त्याज पं०
८१ पकालेविशेषतः ॥ ७७ ॥ धारयेद्विजवर्योयःश्रा ६
वयेद्वासमाहितः ॥ सविष्णुःसशिवःसोहंसोऽक्ष
रःसविराट्स्वराट् ॥ ७८ ॥ शताक्षरात्मकंदे०व्या
नामाष्टाविंशतिःशतम् ॥ शृणुवक्ष्यामितत्सर्वम
तिगुह्यंसनातनम् ॥ ७९ ॥ भूतिदाभुवनावाणी
वसुधासुमनामही ॥ हरिणीजननीनंदासविसर्गा
तपस्विनी ॥ ८० ॥ पयस्विनीसतीत्यागाचैंदवी ८१
सत्यवीरसा ॥ विश्वातुर्यापरारेच्यानिर्घृणीय
मिनीभवा ॥ ८१ ॥ गोवेद्याचजरिष्ठाचस्कंदिनी

धीर्मतिर्हिमा ॥ भीघणायोगिनीपक्षीनदीप्रज्ञाच
चोदिनी ॥ ८२ ॥ धनिनीयामिनीपद्मारोहिणी
रमणीऋषिः ॥ सेनामुखीसामधीचबकुलादोष
वर्जिता ॥ ८३ ॥ सर्वकामदुघासोमोद्भवाहंकारव
र्जिता ॥ द्विपदाचचतुष्पादात्रिपदाचैकषट्पदा ॥
॥ ८४ ॥ अष्टापदीनवपदीसासहस्राक्षरात्मिका ॥
इदंयःपरमंगुह्यंसावित्रीमंत्रपंजरम् ॥ ८५ ॥ ना
माष्टविंशतिशतंशृणुयात्श्रावयेत्पठेत् ॥ मर्त्या
नाममृतत्वायभीतानामभयायच ॥ ८६ ॥ मोक्षा
यचमुमुक्षूणांश्रीकामानांश्रियेसदा ॥ विजयाय

गा० युयुत्सूनांव्याधितानामरोगकृत् ॥ ८७ ॥ वश्या पं०
६२ यवश्यकामानांविद्यायैवेदकामिनाम् ॥ द्रविणा ६
यदरिद्राणांपापिनांपापशांतये ॥ ८८ ॥ वादि
नांवादविजयेकवीनांकविताप्रदम् ॥ अन्नायक्षु
धितानांचस्वर्गायनाकमिच्छताम् ॥ ८९ ॥ पशु
भ्यःपशुकामानांपुत्रेभ्यःपुत्रकांक्षिणाम् ॥ क्लेशि
नांशोकशांत्यर्थंनृणांशत्रुभयायच ॥ ९० ॥ राज
वश्यायद्रष्टव्यंपंजरंनृपसेविनाम् ॥ भक्त्यर्थंवि ६२
ष्णुभक्तानांविष्णौसर्वांतरात्मनि ॥ ९१ ॥ नायकं
विधिसृष्टानांशांतयेभवतिध्रुवम् ॥ निस्पृहाणांनृ

णांमुक्तिःशाश्वतीभवतिध्रुवम् ॥९२॥ जप्यंत्रिवर्ग
संयुक्तंगृहस्थेनविशेषतः ॥ मुनीनांज्ञानसिद्ध्यर्थं
यतीनांमोक्षसिद्धये ॥९३ ॥ उद्यतंचंद्रकिरणमुप
स्थायकृतांजलिः ॥ काननेवास्वभवनेतिष्ठन्शु
द्धोजपेदिदम् ॥ ९४ ॥ सर्वान्कामानवाप्नोतितथै
वशिवसंनिधौ ॥ ममप्रीतिकरंदिव्यंविष्णुभक्ति
विवर्द्धनम् ॥ ९५ ॥ ज्वरार्तानांकुशाग्रेणमार्जये
त्कुष्ठरोगिणाम् ॥ अंगमंगंयथालिंगंकवचेनतु
साधकः ॥ ९६ ॥ मंडलेनविशुद्ध्येतसर्वरोगैर्नसं
शयः ॥ मृतप्रजाचयानारीजन्मवंध्यातथैवच ॥

॥ ९७ ॥ कन्यादिवंध्यायानारीतासामंगंप्रमा
र्जयेत् ॥ पुत्रानरोगिणस्तास्तुलभंतेदीर्घजीवि
नः ॥ ९८ ॥ तास्ताःसंवत्सरादर्वाग्गर्भन्तुदधिरे
पुनः ॥ पतिविद्वेषिणीयास्त्रीअंगंतस्याःप्रमार्ज
येत् ॥ ९९ ॥ तमेवभजतेसास्त्रीपतिंकामवशं
नयेत् ॥ अश्वत्थेराजवश्यार्थंबिल्वमूलेस्वरू-
पभाक् ॥ १०० ॥ पालाशमूलेविद्यार्थीतेजसा
भिमुखोरवौ ॥ कन्यार्थीचंडिकागेहेजपेच्छत्रु
भयायच ॥ १०१ ॥ श्रीकामोविष्णुगेहेचउद्या
नेश्रीवशीभवेत् ॥ आरोग्यार्थेस्वगेहेचमोक्षार्थी

शैलमस्तके ॥ १०२ ॥ सर्वकामोविष्णुगेहेमोक्षा
र्थीयत्रकुत्रचित् ॥ जपारंभेतुहृदयंजपांतेकवचं
पठेत् ॥ १०३ ॥ किमत्रबहुनोक्तेनशृणुनारदत
त्त्वतः ॥ यंयंचिंतयतेनित्यंतंतंप्राप्नोतिनिश्चितम्
॥ १०४ ॥ इतिश्रीमद्वासिष्ठसंहितायांब्रह्मनारद
संवादेश्रीमद्गायत्रीपंजरस्तोत्रंसमाप्तम् ॥ ६ ॥

॥ अथगायत्रीस्तवराजः ॥

ॐ अस्यश्रीगायत्रीस्तवराजस्तोत्रमंत्रस्यवि
श्वामित्रऋषिःसकलजननीचतुष्पदागायत्रीपर
मात्मादेवतासर्वोत्कृष्टपरंधामप्रथमपादो बीजं

द्वितीयःशक्तिः तृतीयःकीलकंदशप्रणवसंयुक्ता
सव्याहृतिकातूर्यपादसहिताव्यापकंममधर्मार्थ
काममोक्षार्थैजपेविनियोगः॥ न्यासंकृत्वाध्याये
त्॥ तद्यथा॥ गायत्रीवेदधात्रींशतमखफलदांवेद
शास्त्रैकवेद्यां चिच्छक्तिंब्रह्मविद्यांपरमशिवपदां
श्रीपदंवैकरोति॥ सर्वोत्कृष्टंपदंतत्सवितुरनुपदां
तेवरेण्यंशरण्यं भर्गोदेवस्यधीमह्यभिदधातिधि
योयोनःप्रचोदयादित्यांवंतेजः॥१॥साम्राज्यबी
जंप्रणवत्रिपादंसव्यापसव्यंप्रजपेत्सहस्रक्रमम्॥
संपूर्णकामंप्रणवंविभूतिं तथाभवेद्वाक्यावेचित्र

वाणी॥२॥शुभंशिवंशोभनमस्तुमह्यंसौभाग्यभो
गोत्सवमस्तुनित्यं ॥ प्रकाशविद्यात्रयशास्त्रसर्वं
भजेन्महामंत्रफलंप्रियेवै॥३॥ ब्रह्मास्त्रंब्रह्मदंडंशि
रसिशिखिमहद्ब्रह्मशीर्षंनमोतं सूक्तंपारायणोक्तं
प्रणवमथमहावाक्यसिद्धांतमूलं॥तूर्य्यंत्रीणिद्वि
तीयंप्रथममनुमहावेदवेदांतसूक्तंनित्यंस्मृत्यानु
सारंनियमितचरितंमूलमंत्रंनमोतं ॥ ४॥ अस्त्रंश
स्त्रहतंअघोरसाहितंदंडेनवाजीहतंआदित्यादिह
तंशिरोंतसहितं पापक्षयार्थंपरं ॥ तुर्य्यांत्यादिवि
लोममंत्रपठनं बीजंशिखांतोर्ध्वकम् नित्यंकाल

 नियम्यविप्रविदुषांकिंदुष्कृतंभूसुरान् ॥ ८ ॥
 नित्यंमुक्तिप्रदं नियम्यपवनं निर्घोषशक्तित्रयं
सम्यग्ज्ञानगुरूपदेशविधिवद्देवींशिखांतामपि ॥
षष्ट्यैकोत्तरसंख्ययानुगतसौषुम्नादिमार्गत्रयीं
ध्यायेन्नित्यसमस्तवेदजननीं देवींत्रिसंध्यामयी
म् ॥ ६ ॥ गायत्रींसकलागमार्थविदुषांसौरस्यबीजे
श्वरींसर्वाम्नायसमस्तमंत्रजननीं सर्वज्ञधामेश्व
रीम् ॥ ब्रह्मादित्रयसंपुटार्थकरणींसंसारपाराय
णींसंध्यां सर्वसमानतंत्रपरयाब्रह्मानुसंधायिनी
म् ॥ ७ ॥ एकद्वित्रिचतुःसमानगणनावर्णांष्टकंपाद

योः पादादा प्रणवादि मंत्रपठने मंत्रत्रयीसंपुटाम्॥
संध्यायां द्विपदं पठेत्परतरं सायंतुरीयंयुतां नित्या
नित्यमनंतकोटिफलदं प्रासं नमस्कुर्महे ॥८॥ ओ
जोसीति सहोस्यहो बलमासि भ्राजोसि तेजस्विनी
वर्चस्वी सविताग्निसोममतृंतरूपं परं धीमहि ॥ दे
वानां द्विजवर्यतां मुनिगणे मुक्त्यार्थिनां शांतिनां
ओमित्येकमृचं पठंति यमिनो यं यं स्मरेत्प्राप्नुया
त् ॥ ९ ॥ ओमित्येकमजस्वरूपममलं तत्स
प्धाभादितं तारं तंत्रसमान्वितं परतरे पादत्रयं ग
र्भितम् ॥ आपो ज्योतिरसोमृतं जन महः सत्यं तपः

स्वर्भुवर्भूयोभूयनमामिभूर्भुवस्वरोमेतैर्महामंत्र
कम् ॥ १० ॥ आदौबिंदुमनुस्मरन्परतरेबालात्रि
वर्णोच्चरन्व्याहृत्यादिसबिंदुयुक्तात्रिपदातारत्रयं
तुर्यकम् ॥ आरोहादवरोहतःक्रमगताश्रीकुंड
लीत्थंस्थिता देवीमानसपंकजेत्रिनयनापंचान
नापातुमाम् ॥ ११ ॥ सर्वैसर्ववशेसमस्तसमयेस
त्यात्मिकेसात्विकेसावित्रीसवितात्मकेशशियु
तेसांख्यायनीगोत्रजे॥संध्यात्रीण्युपकल्पयसंग्र
हविधैः संध्याभिधानामकेगायत्रीप्रणवादिमंत्र
गुरुणासंप्राप्यतस्मैनमः ॥ १२ ॥ क्षेमंदिव्यमनो

रथाः परतरेचेत समाधीयतांज्ञानं नित्यवरेण्यमे
तदमलंदेवस्यभर्गोधियम् ॥ मोक्षश्रीविजयार्थि
नोऽथसवितुःश्रेष्ठांविधिस्तत्पदंप्रज्ञामेधप्रचोदया
त्प्रातिदिनंयोनःपदंपातुमाम् ॥ १३ ॥ सत्यंतत्स
वितुर्वरेण्यविरलं विश्वादिमायात्मकंसर्वाद्यंप्रति
पादपादरमयातारंतथामन्मथम् ॥ तुर्य्यान्यत्रि
तयंद्वितीयमपरंसंयोगसव्याहृतिं सर्वाम्नायम
नोन्मनीमनसिजांध्यायामिदेवींपराम् ॥ १४ ॥
आदौगायत्रिमंत्रं गुरुकृतनियमंधर्मकर्मानुकूलं
सर्वाद्यंसारभूतं सकलमनुमयंदेवतानामगम्यम्

॥ देवानांपूर्वदेवांद्विजकुलमुनिभिःसिद्धविद्याधरा
द्यैः कोवावक्तुंसमर्थस्तवमनुमहिमाबीजराजा
दिमूलम् ॥ १५ ॥ गायत्रींत्रिपदांत्रिबीजसहितां
त्रिव्याहृतिंत्रैपदां त्रिब्रह्मात्रिगुणांत्रिकालनियमां
वेदत्रयींतांपरां॥ सांख्यादित्रयरूपिणींत्रिनयनां
मातृत्रयीं तत्परां त्रैलोक्यात्रिदशात्रिकोटिसहि
तांसंध्यांत्रयींतांनुमः॥ १६॥ ओमित्येतत्त्रिमात्रा
त्रिभुवनकरणं त्रिस्वरंवह्निरूपंत्रीणित्रीणित्रिपा
दंत्रिगुणगुणमयंत्रैपुरांतंत्रिसूक्ष्मम् ॥तत्त्वानांपूर्व
शक्तिंद्वितियगुरुपदंपीठयंत्रात्मकंतंतस्मादेतात्त्रे

पादंत्रिपदमनु[illegible]त्राहिमांभोनमस्ते ॥ १७ ॥ स्व
स्तिश्रद्धातिमेधामधुमतिमधुरः संशयः प्रज्ञकां
तिर्विद्याबुद्धिर्बलंश्रीरतनधनपतिःसौम्यवाक्या
नुवृत्तिः ॥ मेधाप्रज्ञाप्रतिष्ठामृदुपतिमधुरापूर्णवि
द्याप्रपूर्णं प्राप्संप्रत्यूषचिंत्यंप्रणवपरवशात्प्राणि
नांनित्यकर्म ॥ १८ ॥ पंचाशद्वर्णमध्येप्रणवपर
युते मंत्रमाद्यं नमोंतं सर्वंसव्यापसव्यंशतगुणम
भितोवर्णमष्टोत्तरंते ॥ एवंनित्यंप्रजप्तंत्रिभुवन
सहितंतूर्य्यमंत्रंत्रिपादं ज्ञानंविज्ञानगम्यंगगनसु
सदृशंध्यायतेयःसमुक्तः॥१९॥आदिक्षांतसबिंदु

गा० युक्तसहितंमेरुंक्षकारात्मकंव्यस्ताव्यस्तसमस्त स्त०
६८ वर्गसहितंपूर्णंशताष्टोत्तरम् ॥ गायत्रींजपतांत्रि ७
कालसहितांनित्यंसनैमित्तिकंएवंजाप्यफलंशि
वेनकथितंसद्भोग्यमोक्षप्रदम् ॥ २० ॥ सप्तव्याहृ
तिसप्ततारविकृतिःसत्यंवरेण्यंधृतिः सर्वंतत्सवि
तुश्चधीमहिमहाभर्गस्यदेवंभजे ॥ धाम्नोधाम
धर्माधिधारणमहान्धीमत्पदंध्यायते ॐतत्सर्व
मनुप्रपूर्णंदशकंपादत्रयंकेवलम्॥२१॥विज्ञानंवि ६८
लसद्विवेकवचसःप्रज्ञानुसंधारिणीं श्रद्धामेध्यय
शःशिरःसुमनसःस्वस्तिश्रियत्वांसदा ॥ आयुष्यं

धनधान्यलक्ष्मिमतुलांदेवींकटाक्षंपरंतत्कालेस
कलार्थसाधनमहान्मुक्तिर्महत्त्वंपदम् ॥ २२ ॥
पृथ्वीगंधोर्च्चनायां नभासिकुसुमतावायुधूपप्रक
र्षो वन्हिर्दीपप्रकाशो जलममृतमयंनित्यसंक
ल्पपूजा ॥ एतत्सर्वंनिवेद्यंसुखवसातिहार्दसर्व
दादंपतीनां त्वंसर्वज्ञशिवंकुरुष्वममतानाहंत्वया
ज्ञेयासि ॥ २३ ॥ सौम्यंसौभाग्यहेतुंसकलसु
खकरंसर्वसौख्यंसमस्तं सत्यंसद्भोगनित्यंसुख
जनसुहृदंसुंदरं श्रीसमस्तम् ॥ सौमंगल्यंसमग्रंस
कलशुभकरंस्वास्तिवाचंसमस्तं सर्वाद्यंसद्विवेकं

गा० त्रिपदपदयुगंप्राग्नुमध्यासमस्तम् ॥ २४ ॥ गाय स्त०
६९ त्रीपदपंचपंचप्रणवद्वंद्वांत्रिधासंपुटंसृष्टयादिक्रम ७
मंत्रजाप्यदशकंदेवीपदंक्षुन्नयम् ॥ मंत्रादिस्थि
तकेषुसंपुटमिदं श्रीमातृकावेष्टनं वर्णात्यादिवि
लोममंत्रजपनंसंहारसंमोहनम् ॥ २५ ॥ भूरा
द्यंभूर्भुवस्वस्त्रिपदपदयुतंत्र्यक्षमाद्यंतयोज्यं सृष्टि
स्थित्यंतकार्यंक्रमशिखिसकलंसर्वमंत्रं प्रशस्त
म् ॥ सर्वांगंमातृकाणांमनुमयवपुषंमंत्रयोगंप्र ६९
युक्तंसंहारंक्षादिवर्णंवसुशतगणनं मंत्रराजं नमा
मि ॥ २६ ॥ वैश्वामित्रमुदाहृतंहितकरंसर्वार्थसि

द्धिप्रदंस्तोत्राणांपरमं प्रभातसमयेपारायणं नि
त्यशः ॥ वेदानांविधिवादमंत्रसकलंसिद्धिप्रदंसं
पदांसंप्राप्नोत्यपरत्रसर्वसुखदं आयुष्यमारोग्य
ताम् ॥ २७ ॥ इति विश्वामित्रकृतोगायत्रीस्तव
राजःसमाप्तः ॥ ॥ ॥ ॥ ॥

॥ अथसहस्रनाम ॥

ॐ कैलासेसुखमासीनंतुषारकरशेखरम् ॥ बद्धां
जलिर्नमस्कृत्याभ्यर्च्यपृच्छतिपार्वती ॥ १ ॥ पार्व
त्युवाच ॥ किंविन्यस्तंत्वयादेवस्वशरीरेनिरंतर
म् ॥ कथमेतादृशीकांतिःकथंतेष्टौसमृद्धयः ॥ २ ॥

गा० सर्वतत्त्वप्रभुत्वंचकथंकथमथाश्रयेत् ॥ कृपया स०
६० ब्रूहिदेवेशप्रसन्नोसियदिप्रभो ॥ ३ ॥ भगवान्वि ८
विधाविद्याःश्रोतुमिच्छामितेप्रभो॥इदानींश्रोतु
मिच्छामिगायत्र्याश्चमहोत्सवम् ॥ ४ ॥ नाम्नां
सहस्रंदेवेशकृपयावक्तुमर्हसि ॥ यद्यहंप्रेयसीभा
र्य्यायद्यहंप्राणवल्लभा ॥ ५ ॥ इतिश्रुत्वावचोदे
व्याःप्रसन्नःप्रभुरीश्वरः ॥ श्रूयतामितिचाभाष्य
जगादजगदंबिकाम् ॥ ६ ॥ शृणुदेविरहस्यंमेक ६०
स्याप्यग्रेनचोदितम् ॥ गोपितंसर्वतंत्रेषुसिद्धानां
स्तोत्रमुत्तमम् ॥ ७॥ सर्वसौभाग्यजनकंसर्वसंप

त्तिदायकम् ॥ सर्ववश्यकरं लोके सर्वप्रत्यूहनाशनम् ॥ ८ ॥ सर्ववादिमुखस्तंभिनिग्रहानुग्रहक्षमम् ॥ त्वत्प्रीत्याकथयिष्यामि सुगोप्यमपिदुर्लभम् ॥ ९ ॥ सर्वपापक्षयकरं सर्वज्ञानमयं शिवम् ॥ परायणानांपरमापरब्रह्मस्वरूपिणी ॥ १० ॥ पराचपरमेशानिपरब्रह्मात्मिकामता ॥ सादेवीचवरारोहाचेतसाचिंतयाम्यहम् ॥ ११ ॥ ऐश्वर्यंचदशप्राप्तिर्वरदादित्वमेवच ॥ गायत्र्यादिव्यसाहस्रंस्वप्नेचाप्तंमयापियत् ॥ १२ ॥ ऋषिरस्यसमाख्यातोमहादेवोमहेश्वरः ॥ देवतादेवजननी

छंदः सामादिकीर्तितम् ॥ १३ ॥ धर्मार्थकाममो
क्षार्थेविनियोगउदाहृतः ॥ सर्वभूतांतरीध्या
त्वापद्मासनगतांशुचिः ॥ १४ ॥ ततःसहस्रनामे
दंपठितव्यंमुमुक्षुभिः ॥ सर्वकार्यकरंपुण्यंमहा
पातकनाशकम् ॥ १५ ॥ ॐ तत्काररूपातद्रू
पातत्पदार्थस्वरूपिणी॥ तपःस्वाध्यायनिरतात
पस्वीवाग्विदांवरा ॥ १ ॥ तत्कीर्तिगुणसंपन्ना
तथ्यवादीतपोनिधिः ॥ तत्पदेशानुसंबंधातपो
लोकनिवासिनी ॥ २ ॥ तरुणादित्यसंकाशा
तप्तकांचनभूषणा ॥ तमोपहारिणीतंत्रांतान्त्रिपा

तनिवारिणी ॥ ३ ॥ तलादिभुवनांतःस्थाता
रिणीतारस्वरूपिणी ॥ तर्करूपितकाषादितर्कशा
स्त्रविदारिणी ॥ ४ ॥ तर्कवादिमुखास्तंभाराज्ञां
चपरिपालिनी ॥ तंत्रसारातंत्रमातातंत्रमार्गप्रद
र्शिनी ॥ ५ ॥ तंत्रीतंत्राविधानज्ञातंत्रस्थातंत्रसा
क्षिणी ॥ तदेकध्याननिरतातत्त्वज्ञानप्रबोधिनी
॥ ६ ॥ तन्नाममंत्रसुप्रीतातपस्विजनसेविता ॥
ॐकाररूपासावित्रीसर्वरूपासनातना ॥ ७ ॥
संसारदुःखशमनीसर्वयागफलप्रदा ॥ ८ ॥ स
फलासत्यसंकल्पासत्यासत्यप्रदायिनी ॥ संतो

गा० षजननीसारासत्यलोकनिवासिनी ॥ ९ ॥ समु स०
६२ द्रतनयाराध्यासामगानाप्रियासती ॥ समाना ८
सामिधेनीचसमस्तसुरसेविता ॥ १० ॥ सर्वसं
पत्तिजननीसंप्रदासिंधुसेविता ॥ सर्वोत्तुंगातुंग
हीनासद्गुणासकलेष्टदा ॥ ११ ॥ सनकादिमुनि
ध्येयासमानाधिकवर्जिता ॥ साध्यासिद्धासुधा
वासासिद्धिःसाध्यप्रदायिनी ॥ १२ ॥ सम्यगा
राध्यनिलयासमुत्तीर्णासदाशिवा ॥ सर्ववेदांत ६२
निलयासर्वशास्त्रार्थवादिनी ॥ १३ ॥ सहस्रदल
पद्मस्थासर्वज्ञासर्वतोमुखी ॥ समयासमयाचा

रासत्याषड्ग्रंथिभेदिनी ॥ १४ ॥ सप्तकोटिमहा
मंत्रमातासर्वप्रदायिनी ॥ सगुणासंभ्रमासाक्षी
सर्वचैतन्यरूपिणी ॥ १५ ॥ सत्कीर्तिःसात्विकी
साध्वीसच्चिदानंदरूपिणी ॥ संकल्परूपिणीसं
ध्याशालाग्रामनिवासिनी ॥ १६ ॥ सर्वोपाधि
विनिर्मुक्तासत्यज्ञानप्रबोधिनी ॥ विकाररूपा
विप्रश्रीर्विप्राराधनतत्परा ॥ १७ ॥ विप्रिणी
विप्रकल्याणीविप्रवाक्यस्वरूपिणी ॥ विप्रकैव
ल्यशयनीविप्रीविप्रप्रसादिनी ॥ १८ ॥ विप्रमं
दिरमध्यस्थाविप्रवादविनोदिनी ॥ विप्रोपाधिवि

गा० निर्मुक्ताविप्रहत्याविमोचनी ॥१९॥ विप्रत्राताावि स०
६३ प्रगोत्राविप्रगोत्राविवर्धिनी ॥ विप्रभोजनसंतुष्टा ८
विष्णुरूपाविनोदिनी ॥ २० ॥ विष्णुमायाविष्णु
वंद्याविष्णुगर्भाविचित्रिणी॥वैष्णवीविष्णुभगिनी
विष्णुमायाविलासिनी ॥ २१ ॥ विकाररहिता
वंद्याविज्ञानघनरूपिणी ॥ विश्वसाक्षीविश्वयोनि
र्विश्वामित्रप्रसादिनी ॥२२॥ विबुधाविष्णुसंक
ल्पाविकल्पाविश्वसाक्षिणी ॥ विष्णुचैतन्यानि ६३
लयाविष्णुस्थाविश्ववादिनी ॥ २३ ॥ विवेकीवि
विधानंदीविजयाविश्वमोहिनी ॥ विद्याधरीवि

धानज्ञाविबुधार्थस्वरूपिणी ॥ २४ ॥ विरूपाक्षी
विराड्रूपाविक्रमाविश्वमंगला ॥ विश्वंभरास
माराध्याविश्वभ्रमणकारिणी ॥ २५ ॥ विनाय
कीविनोदस्थावीरगोष्ठीविवर्द्धिनी ॥ विवाहराहि
तावंद्याविंध्याचलनिवासिनी ॥२६॥ विद्याविद्या
करीवेद्यावैद्याविद्याप्रबोधिनी ॥ विमलाविभवावि
द्याकिंकस्थाकिंकसाक्षिणी ॥ २७ ॥ वीरमध्या
वरारोहावितंत्राविश्वनायका ॥ वीरहत्याप्रश
मनीविनम्रजनपावनी ॥ २८ ॥ वीरधाविविधा
काराविरोधजनवादिनी ॥ तुकारूपातुतुर्यश्रीस्तु

गा० लसीवनवासिनी ॥ २९ ॥ तुलस्यामातुला स०
६४ तुल्यातुल्यगोत्रीतुलेश्वरी ॥ तुरंगीतुरगारूढातु ८
रंगरयमोदिनी ॥ ३०॥ तुरंगरदनामोहातुलादा
नफलप्रदा ॥ तुलामाघस्नानतुष्टातुष्टिपुष्टिप्रदा
यिनी ॥ ३१ ॥ तुरंगमप्रसंतुष्टातुलितातुल्यम
ध्यगा ॥ तुंगोत्तुंगातुंगकुचातुहिनाचलसंस्थि
ता ॥ ३२ ॥ तुंबुरादिस्तुतिप्रीतातुषारवपुषेश्व
री ॥ तुष्टाचतुष्टजननीतुष्टलोकनिवासिनी ॥ ६४
॥ ३३ ॥ तुलाधारातुलामध्यातुलस्थातुलरूपि
णी ॥ तुरीयगुणगंभीरातुर्यनामस्वरूपिणी ॥

॥ ३४ ॥ तुर्य्यविद्वल्लास्यसंस्थातुर्य्यशास्त्रार्थवा
दिनी ॥ तुर्य्यशास्त्रार्थतत्वज्ञातुर्य्यवादविनोदि
नी ॥ ३५ ॥ तुर्य्यनादातनिलयातुर्य्यानंदस्वरू
पिणी ॥ तुरीयभक्तिजननीतुर्य्यमार्गप्रदर्शिनी
॥ ३६ ॥ वकाररूपावागेशीवरेण्यावरसंस्थिता
॥ वरावरिष्ठावैदेहीवैद्यशास्त्रप्रदर्शिनी ॥ ३७ ॥
वैकल्पश्रमणीवाणीवांछितार्थफलप्रदा ॥ वय
स्थावयमध्यस्थावयोवस्थाविवर्जिता ॥ ३८ ॥ वं
दिनीवादिनीवार्य्यावाङ्मयीवीरवंदिनी ॥ वानप्र
स्थाश्रमस्थार्यावनदुर्गावनालया ॥ ३९ ॥ वन

गा० जाक्षीवनचरीवनितावनमोदिनी ॥ वसिष्ठावाम स०
६५ देवादिवंद्यावंद्यस्वरूपिणी ॥ ४० ॥ वाल्मीकिवा ८
क्करीवाचावारुणीवरुणप्रिया ॥ वैद्यावैद्यचिकि
त्साचवषट्कारीवसुंधरा ॥ ४१ ॥ वसुमातावसु
त्रातावसुजन्मविमोचनी॥ वसुप्रदावासुदेवीवासु
देवमनोहरी ॥ ४२ ॥ वासवार्चितपादश्रीर्वासवा
रिविनाशिनी ॥ वागीशवाङ्मनःस्थायी वनवा
सवशावशी ॥ ४३ ॥ वामदेवीवरारोहावाद्यघोष ६६
णतत्परा ॥ वाचस्पतिसमाराध्यावागीशोवाच
कीरवाक् ॥ ४४ ॥ रेकाररूपारेवाचरेवातीरानि

वासिनी ॥ रेकिणीरेवतीरक्षारुद्रजन्मारजस्वला
॥ ४५ ॥ रेणुकारमणीरम्यारातिवृद्धारतारती ॥
रावणादित्यदानंदाराजश्रीराजशेखरा ॥ ४६ ॥
रणमध्यारथारूढारविकोटिसमप्रभा ॥ रविमंड
लमध्यस्थारजनीरविलोचना ॥ ४७ ॥ रथांगपा
णिरक्षोघ्नीरागिणीरावणार्चिता ॥ रंभादिकन्य
काराध्याराज्यदाराज्यवर्द्धिनी ॥ ४८ ॥ रजता
द्रीशऊरुस्थारम्याराजीवलोचना ॥ रमावाणीर
माराध्याराज्यदात्रीरथोत्सवा ॥ ४९ ॥ रेतोवती
रथोत्साहाराजहृद्रोगहारिणी ॥ रंगप्रवृद्धमधुरा

रंगमंडपमध्यगा ॥५०॥ रंजिताराजजननीरमा
रेवारतीरणा ॥ राविणीरागिणीराज्याराजराजे
श्वरार्चिता ॥ ५१ ॥ राजन्वतीराजनीतिस्तथार
जतवासिनी ॥ राघवार्चितपादश्रीराघवाराघव
प्रिया ॥ ५२ ॥ रत्नसागरमध्यस्थारत्नद्वीपनिवा
सिनी ॥ रत्नप्राकारमध्यस्थारत्नमंडपमध्यगा
॥ ५३ ॥ रत्नाभिषेकसंतुष्टारत्नांगीरत्नदायि
नी॥निकाररूपिणीनित्यानित्यतृप्तानिरंजना ॥
॥५४॥निद्रात्ययाविशेषज्ञानीलजीमूतसन्निभा ॥
नीवारशुकवत्तन्वीनित्यकल्याणरूपिणी ॥५५॥

नित्योत्सवानित्यानित्यानित्यानंदस्वरूपिणी

॥ निर्विकल्पानिर्गुणस्थानिश्चिंतानिरुपद्रवा ॥

॥ ५६ ॥ निःसंशयासंशयघ्नीनिर्लोभालोभनाशि

नी ॥ निर्भवाभवपाशघ्नीनितिशास्त्रविचारिणी ॥

॥ ५७ ॥ निखिलागममध्यस्थानिखिलागमसं

स्थिता ॥ नित्योपाधिविनिर्मुक्तानित्यकर्मफल

प्रदा ॥ ५८ ॥ नीलग्रीवानिरीहाचानिरंजनवरप्र

दा॥नवनीतप्रियानारीनरकार्णवतारिणी ॥५९॥

नारायणीनिराहारानिर्मलानिर्गुणाप्रिया ॥ निर्म

लानिर्गमाचारानिखिलागमवेदिनी॥६०॥ निमि

षानिमेषोत्पन्नानिमेषांडविधायिनी॥ निवातदी
पमध्यस्थानिश्चिंतार्चितनाशिनी ॥६१॥ नीलवे
णीनीलखंडानिर्विषाविषनाशिनी॥ नीलांशुकप
रीधानानिंदितानिर्निरीश्वरी ॥ ६२ ॥ निश्वासा
श्वासमध्यस्थामिथोयानानिवासिनी ॥ यंकाररू
पायंत्रेशीयंत्रयंत्रायशस्विनी ॥ ६३ ॥ यंत्राराध
नसंतुष्टायजमानस्वरूपिणी ॥ यशस्विनीयका
रस्थायूपस्तंभनिवासिनी ॥ ६४ ॥ यमघ्नीयमक ६७
ल्पाचयशःकामायतीश्वरी ॥ यमादियोगनिर
तायतिन्दीपहारिणी ॥ ६५ ॥ यातायज्ञायाज्ञि

याचयज्ञेश्वरपतिव्रता ॥ यज्ञयज्ञायजुर्यज्वायज्ञ
ज्ञीनिकरकारिणी ॥६६॥ यज्ञसूत्रप्रदाज्येष्ठायज्ञ
कर्मफलप्रदा ॥ यवांकुराप्रियायामायवनीयवना
धिपा ॥६७॥ यज्ञकर्त्रीयज्ञभोक्त्रीयज्ञांगीयज्ञवा
हिनी ॥ यज्ञसाक्षीयज्ञमुखीयजुषीयज्ञरक्षकी ॥
॥६८॥भकाररूपाभद्रेशीभद्रकल्याणदायिनी ॥
भक्तप्रियाभक्तसर्वाभक्ताभीष्टस्वरूपिणी॥६९॥
भक्तिनीभक्तिसुलभाभक्तिदाभक्तवत्सला ॥ भ
क्तचैतन्यनिलयाभक्तबंधविमोचनी ॥७० ॥ भ
क्तस्वरूपिणीभग्याभाग्यारोग्यप्रदायिनी ॥ भ

 क्तमाताभक्तगम्याभक्ताभीष्टप्रदायिनी ॥ ७१ ॥
 भास्वरीभैरवीभोगीभवानीभयनाशिनी ॥ भद्रा
त्मिकाभद्रदायीभद्रकालीभयंकरी ॥ ७२ ॥ भ
गनिष्यंदिनीभाग्याभवबंधविमोचिनी ॥ भीमा
भीमननाभंगीभंगुराभीमदर्शिनी ॥ ७३ ॥ भ
ल्लीभल्लीधराभेरुभैरुंडाभीमपापहा ॥ भावज्ञाभो
ग्यदात्रीचभवघ्नीभूतिभूषणा ॥ ७४ ॥ भूतिदाभू
मिदात्रीचभूपातित्वप्रदायिनी ॥ भ्रामरीभ्रमरी
भारीभवसंसारतारिणी ॥ ७५ ॥ भंडासुरवधो
त्साहाभांडवाभाविनोदिनी ॥ गोकाररूपागो

मातागुरुपत्नीगुरुर्गिरा ॥ ७६ ॥ गोरोचनप्रियागौ
रीगोविंदगुणवर्द्धिनी ॥ गोपालचेष्टासंतुष्टागोवर्ध
नविवर्द्धिनी ॥ ७७॥ गोविंदरूपिणीगोप्तागोप्तागो
त्रविवर्द्धिनी ॥ गीतागीतप्रियागेयागोकागोकुल
वर्द्धिनी ॥ ७८ ॥ गोपीगोहत्यशमनीगुणाचगुण
विग्रहा ॥ गोविंदजननीगोष्ठागोपदागोकुलोत्स
वा ॥ ७९ ॥ गोचरीगौतमीगोप्त्रीगोमुखीगुरुवा
सिनी ॥ गोपालीगोमयीगुंठागोष्ठीगोपुरवासि
नी ॥८०॥ गरुडीगरुडश्रेष्ठागारुडीगरुडध्वजा ॥
गंभीरागंडकीगंगागरुडध्वजवल्लभा ॥ ८१ ॥

गगनस्थागयावासागुणवृत्तिर्गुडोद्भवा ॥ देकार
रूपादेवेशीहंशिनीदेवतार्चिता ॥ ८२ ॥ देवरा
जेश्वरार्द्धांगीदीनदैन्यविमोचनी ॥ देशकालप
रिज्ञानादेशोपद्रवनाशिनी ॥ ८३ ॥ देवमातादेव
मोहादेवदानवमोहिनी ॥ देवेंद्रार्चितपादश्रीदेवदे
वप्रसादिनी ॥ ८४ ॥ देशांतरीदेवरूपादेवालय
निवासिनी ॥ देशभ्रमणकृद्देवीदेशस्वास्थ्यप्रदा
यिनी ॥ ८५ ॥ देवयानादेवताचदेवसैन्यप्रपालिनी
॥ वकाररूपावाग्देवीवाचामानसगोचरी ॥ ८६ ॥
वैकुंठदेशिनीवेद्यावायुरूपावरप्रदा ॥ वक्रतुंडा

र्चितपदावक्रतुंडप्रदायिनी ॥ ८७॥ वैचित्रीचव
सुमतिर्वसुस्थानावसुप्रिया ॥ वषट्काराचचामुं
डावरारोहावरावरी ॥ ८८ ॥ वैदेहीजननीवेद्या
वैदेहीशोकनाशिनी ॥ वेदमातावेदकन्यावेदरू
पाविनोदिनी ॥ ८९ ॥ वेदांतवादिनीवेदावेदां
तनिलयामरा ॥ वेदश्रवावेदघोषावेदगानीवि
नोदिनी ॥ ९० ॥ वेदशास्त्रार्थतत्त्वज्ञावेदमार्ग
प्रदर्शिनी ॥ वैदिककर्मफलदावेदसागरतारिणी
॥ ९१ ॥ वेदवादीवेदगृह्यावेदाश्वरथवाहिनी ॥
वेदचक्रावेदवंद्यावेदांगीवेदवित्कविः ॥ ९२॥ स्य

गा० काररूपाश्यामांगीश्यामाश्यामसरोरुहा ॥ श्या स०
७० माकाश्यालवृक्षाचशतपत्रानिकेतना ॥ ९३ ॥ ८
सर्वदृक्संनिविष्टाचसर्वसंप्रेमणीसदा ॥ सव्या
पसव्यदासव्यासध्रीचीचसहायिनी ॥९४॥ सक
लासागरासारासर्वभौमस्वभाविनी ॥ संतोषज
ननीसेव्यासर्वेशीसर्वरंजनी ॥ ९५ ॥ सरस्वती
समाराध्यासमदासिंधुसेविनी ॥ सन्मोहिनीस
दामोहासर्वमांगल्यदायिनी ॥९६॥ समस्तभु
वनेशानीसर्वकामफलप्रदा ॥ सर्वसिद्धिप्रदासा ७०
ध्वीसर्वज्ञानप्रदायिनी ॥ ९७ ॥ सर्वदारिद्र्यश

मनीसर्वदुःखविमोचनी ॥ सर्वरोगप्रशमनीसर्वपा
पविमोचनी ॥ ९८ ॥ समदृष्टिःसमगुणासर्वसाक्षी
सहायिनी ॥ सामर्थ्यवाहिनीसंख्या सांद्रानंदप
योधरी ॥ ९९ ॥ संकीर्णमंदिरस्थायीसाकेतकु
लपालिनी ॥ संहारीशंकरीशौरीसाकेतपुरवासि
नी ॥ १०० ॥ संबोधनीसमुत्तिष्ठासम्यग्ज्ञान
स्वरूपिणी ॥ १०१ ॥ सम्पत्करीसमानांगीसर्वभा
वसुसंस्थिता ॥ संबोधिनीसमानंदासन्मार्गकुल
पालिनी ॥ १०२ ॥ संजीवनीसर्वमेधासभ्यासंप
त्प्रदायिनी ॥ समिद्धासमिधासीनासामान्यासा

मत्रेदिनी ॥ १०३ ॥ समुत्तीर्णासदाचारासंहारा
सर्वपावनी ॥ सर्पिणीसर्पमाताचसर्पदष्टाविमो
चनी ॥ १०४ ॥ सर्वयागप्रशमनीसर्वज्ञत्वफल
प्रदा ॥ संक्रमासंक्रमासिंधुःसर्गासंग्रामपूजिता
॥ १०५ ॥ संकटासंकटाहारीसकुंकुमविलेपना
॥ सुमुखासुमुखस्थायीसांगोपांगार्चनप्रिया ॥
॥ १०६ ॥ संस्तुतासंस्तुतिःप्रीतिःसत्यवादीस
दासुखी ॥ धीकाररूपाधीमाताधीराधीरप्रसादि
नी ॥ १०७ ॥ धीरोत्तमाधीरधीराधीरस्थाधीर
शेखरा ॥ स्थितिधैर्य्यास्थविष्ठाचस्थपतिस्थल

विग्रहा ॥ १०८॥ धीराधाराधीरवंद्याधीपतिर्धीर
मानसा॥ धीपदाधीपदस्थायीधीशानाधीप्रदास
खी ॥ १०९ ॥मकाररूपीमैत्रेयीमहामंगलदेवता
॥मनोवैकल्यशमनीमलयाचलवासिनी ॥११०॥
मलयध्वजराजश्रीर्मीनाक्षीमधुरालया ॥ महादे
वीमहारूपामहाभैरवपूजिता ॥ १११ ॥ मनुवि
द्यामंत्रमातामंत्रवश्यामहेश्वरी ॥ मत्तमातंगग
मनामधुरामेरुमंडपा ॥ ११२ ॥ महागुप्तामहा
भूतामहाभयविनाशिनी ॥ महाशौरीमहामंत्री
महावैरिविनाशिनी ॥ ११३ ॥ महालक्ष्मीर्महा

गा० गौरीमहिषासुरमर्दिनी ॥ महेशमंडलस्थाचम स०
७२ धुरागमवर्जिता ॥ ११४ ॥ मेधामेधाकरीमेध्या ८
माधवीमधुमर्दिनी ॥ मंत्रामंत्रमयीमान्यामाया
माहिममंत्रिणी॥ ११५ ॥मायारूपीमायधारीमा
यस्थामायवादिनी ॥ मायासंकल्पजननीमाया
मायाविनोदिनी॥११६॥मायातपंचजननीमाया
संहाररूपिणी ॥ मायामंत्रप्रसादाचमायाजनवि
मोहिनी ॥ ११७ ॥ महापरामहारूपामहाविघ्नवि ७२
नाशिनी ॥ महानुभावामंत्रेशीमहामंगलदेवता
॥ ११८ ॥ हिंकारस्थाहृषीकेशीहितकार्यप्रवर्द्धिं

नी ॥ हीनोपाधिविनिर्मुक्ता हीनलोकविमोचनी ॥ ११९ ॥ ह्रींकारा ह्रीमती ह्रीं ह्रीं ह्रींदेवी ह्रींस्वभाविनी ॥ ह्रीमती ह्रींव्रती ह्रत्स्वा ह्रींशिवा ह्रींकुलोद्भवा ॥ १२० ॥ हितवादी हितप्रीता हितकारुण्यवर्द्धिनी ॥ हिताशनी हितक्रोधा हितकर्मफलप्रदा ॥ १२१ ॥ हिमा हिमसुता हेमा हेमाचलनिवासिनी ॥ हेती हिमप्रदा हारा होत्रा होतृहुतप्रदा ॥ १२२ ॥ हिमस्था हिमजा हेमा हितकर्मस्वभाविनी ॥ १२३ ॥ धीकाररूपा धिषणा धर्मरूपा धनेश्वरी ॥ धनुर्धरा धराधारा धर्मकर्मफलप्रदा ॥ १२४ ॥ धर्माचारा

गा० धर्मसाराधर्ममध्यनिवासिनी॥ धनुर्वेदीधनुर्वादी स०
७३ धन्याधूर्तविनाशिनी ॥ १२५ ॥ धनधान्याधेनु ८
रूपाधनाढ्याधनदायिनी ॥धनेशीधर्मनिरताधर्म
राजप्रसादिनी ॥ १२६ ॥ धर्मस्वरूपाधर्मेशीध
र्माधर्मविचारिणी ॥ धर्मसूक्ष्माधर्मसाक्षीधर्मिष्ठा
धर्मगोचरा ॥ १२७ ॥ योकाररूपायोगेशीयोग
स्थायोगरूपिणी ॥ योगायोगोपमाराध्यायो
गमार्गनिवासिनी॥१२८॥ योगासनस्थायोगेशी ७३
योगमायाविलासिनी ॥ योगायोगोपमाराध्या
योगांगीयोगविग्रहा॥१२९॥ योगवासीयोगभो

गीयोगमार्गप्रदर्शिनी ॥ १३० ॥ योधायोधवती
योध्याऽयोध्यायोधनतत्परा ॥ योधिनीयोधिनी
सेव्यायोधज्ञानप्रबोधिनी ॥ १३१ ॥ योगेश्वरप्राण
नाथायोगीश्वरहृदिस्थिता ॥ योगायोगक्षेमकर्त्री
योगक्षेमविहारिणी ॥ १३२ ॥ योगराजेश्वराराध्या
योगानंदस्वरूपिणी ॥ १३३ ॥ नवसिद्धिसमारा
ध्यानारायणमनोहरी ॥ नारायणीनवाधारानवब्र
ह्मार्चितासदा ॥ १३४ ॥ नगेंद्रतनयाराध्यानामरू
पविवर्जिता ॥ नारासिंहार्चितपदानवबंधाविमोच
नी ॥ १३५ ॥ नवग्रहार्चितपदानवबंधाविमोच

नी ॥ नैमित्तिकार्थनपदानंदितारिविनाशिनी
॥ १३६ ॥ नवसूत्रविधानज्ञानैमिषारण्यवासिनी
॥ नवपीठस्थितादेवीनवर्षिगणसेविता ॥ १३७॥
नवचंदनादिग्धांगीनवकुंकुमधारिणी ॥ नववस्त्रप
रीधानानवरत्नविभूषणा ॥१३८॥ नवभस्मविदि
ग्धांगीनवचंद्रकलाधरा ॥ प्रकाशरूपाप्राणेशी
प्राणसंरक्षणीसदा ॥ १३९॥ प्राणसंजीवनीप्राणा
प्राणाप्राणप्रबोधिनी ॥प्रज्ञाप्रज्ञाप्रभाप्राच्याप्रती
चीप्रबुधाप्रिया ॥ १४० ॥ प्राचीराप्रणयांतस्थाप्र
भातज्ञानरूपिणी ॥ प्रभातकर्मसंतुष्टप्राणायाम

परायणा ॥ १४१ ॥ प्रायज्ञाप्रणवाप्राप्ताप्रवृत्तिः
प्रकृतिःपरा ॥ १४२ ॥ प्रबंधाप्रबुधासाक्षीप्राज्ञा
प्रारब्धनाशिनी ॥ प्रबोधानिरताप्रेक्ष्याप्रबंधप्राण
साक्षिणी ॥ १४३ ॥ प्रयागतीर्थनिलयाप्रत्यक्षा
परमेश्वरी ॥ प्रणवाद्यंतनिलयाप्रणवादिप्रचोद
यात् ॥ १४४ ॥ चोंकाररूपाचोरघ्नीचोरबाधावि
नाशिनी ॥ चेतनाचेतनाशीताचौराचौर्यचम
त्कृतिः ॥ १४५ ॥ चक्रवर्तित्वधारीचचक्रिणीच
क्रधारिणी ॥ चिरंजीवीचिदानंदाचिद्रूपाचिद्वि
लासिनी ॥ १४६ ॥ चिंताचित्तप्रशमनीचिं

गा० तितार्थफलप्रदा ॥ चांपेयीचंपकप्रीताचंडीचं स०
७९ डाट्टहासिनी ॥ १४७ ॥ चंडेश्वरीचंडमाता ८
चंडमुंडविनाशिनी ॥ चकोराक्षीचिरप्रीता
चिकुराचिकुरप्रिया ॥ १४८ ॥ चैतन्यरूपिणीचै
त्रीचेतनाचित्तसाक्षिणी ॥ चित्राचित्रविचित्रांगी
चित्रगुप्तप्रसादिनी ॥ १४९ ॥ चलनाचलसंस्था
यीचापिनीचलचित्रिणी ॥ चंद्रमंडलमध्यस्था
कोटिचंद्रसुशीतला ॥ १५० ॥ चंद्रानुजसमारा ७९
ध्याचंद्रचंद्रमहोदरी॥चर्चितारिश्चन्द्रमाताचन्द्र
कांताचलेश्वरी॥ १५१ ॥ चराचरनिवासाचचक्र

पाणिसहोदरी ॥ दकाररूपादत्तश्रीर्दारिद्र्यच्छे
दकारिणी ॥ १५२ ॥ दांतिनीदंडिनीदीनाद
रिद्रादीनवत्सला ॥ दक्षाराध्यादक्षकन्यादक्षय
ज्ञविनाशिनी ॥ १५३ ॥ दक्षादाक्षायणीदक्षादी
क्षादक्षवरप्रदा ॥ दक्षिणादक्षिणाराध्यादक्षिणा
मूर्तिरूपिणी ॥ १५४ ॥ दयावतीदमवतीदनुजा
रिर्दयानिधिः ॥ दंतशोभानिभादैवदमनादाडि
मस्तनी ॥ १५५ ॥ दंडादमयतादंडीदंडादंडप्र
सादिनी ॥ दंडकारण्यनिलयादंडकारिविनाशि
नी ॥ १५६ ॥ दंष्ट्राकरालवदनादंडशोभादला

दली ॥ दरिद्रारिष्टशमनीदमादमनपूजिता ॥
॥ १५७ ॥ दानवार्चितपादश्रीर्द्रविणाद्राविणीद
या ॥ दामोदरीदानवारिर्दामोदरसहोदरी ॥
॥ १५८ ॥ दातादानप्रियादात्रीदानश्रीर्दीनदंड
पा ॥ दम्पतीदम्पतीदूर्वादधिदुग्धादयादमा ॥
॥ १५९ ॥ दाडिमीबीजसंदोहदंतपंक्तिविराजि
ता ॥ दर्पणादर्पणस्वच्छाद्रुममंडलवासिनी ॥
॥ १६० ॥ दशावतारजननीदशादिग्दीपपूजिता
॥ दयादशादिशादश्यादशदासीदयानिधिः ॥
॥ १६१ ॥ देशकालपरिज्ञानादेशकालविशोधि

नी ॥ दशम्यादिकलाराध्यादशग्रीवप्रदर्पहा ॥
॥ १६२ ॥ दशापराधशमनीदशवृत्तिफलप्रदा ॥
॥ यात्काररूपिणीयाज्ञीयादवीयादवार्चिता ॥
॥ १६३ ॥ ययातिपूजनप्रीतायाज्ञिकीयाजकाप्रि
या ॥ यादवीयातनायातायामपूजाफलप्रदा ॥
॥ १६४ ॥ यशस्विनीयमाराध्यायमकन्याय
तीश्वरी ॥ यमादियोगसंतुष्टायोगींद्रहृदिसंगमा
॥ १६५ ॥ यमोपाधिविनिर्मुक्तायशस्याविधिर
च्युता॥ यातनायातनादेहायात्रापापादिवर्जिता
॥ १६६ ॥ इत्येतत्कथितंदेविरहस्यंसर्वकाम

दं ॥ सर्वपापप्रशमनंसर्वतीर्थफलप्रदम् ॥ ॥१६७॥
सर्वरोगहरंपुण्यंसर्वज्ञानमयंशिवम् ॥ सर्वसि
द्धिप्रदंदेविसर्वसौभाग्यवर्द्धनम् ॥ १६८ ॥ आ
युष्यंवर्द्धतेनित्यंलिखितंयत्रतिष्ठति ॥ नचौरा
ग्निभयंतस्यनचभूतभयंक्वचित् ॥ १६९ ॥ किंपु
नर्वरुणार्केनतथापिचवदाम्यहम् ॥ सकृच्छ्रवण
मात्रेणकोटिजन्माघनाशनम् ॥ १७० ॥ महा
पातककोटीनांभंजनंस्मृतिमात्रतः॥ अपवादक
दौर्भाग्यशमनंभुक्तिमुक्तिदम् ॥१७१॥विषरोगा
दिदारिद्र्यमृत्युसंहारकारणम् ॥ सप्तकोटिमहा

मंत्रपारायणफलप्रदम् ॥१७२॥ शतरुद्रीयकोटी
नांजपयज्ञफलप्रदम् ॥ चतुःसमुद्रपर्यंतभूदानंत
त्फलंशिवे ॥१७३॥ सहस्रकोटिगोदानफलदंस्मृ
तिमात्रतः॥कोट्यश्वमेधफलदंजरामृत्युनिवारण
म् ॥ १७४ ॥ कन्याकोटिप्रदानेनयत्फलंलभते
नरः ॥ तत्फलंलभतेसम्यक्नाम्नांदशशतीजपा-
त् ॥ १७५ ॥ यःशृणोतिमहाविद्यांश्रावयेद्वास-
माहितः ॥ सोपिमुक्तिमवाप्नोतियत्रगत्वानशोच
ति ॥ १७६ ॥ ब्रह्महत्यादिपापानांनाशःस्याच्छ्र
वणेनच ॥ किंपुनःपठनादस्यमुक्तिःस्यादनपा

यिनी ॥ १७७ ॥ इदंरहस्यंपरमंपुराणंस्वस्त्य
यनंमहत् ॥ यःसकृद्वापठेत्स्तोत्रंशृणुयाद्वास
माहितः ॥ १७८ ॥ लभतेचततःकामानंतेब्रह्मप
दंव्रजेत् ॥ सचशत्रून्जयेत्सद्योमातंगानिवके
सरी ॥ १७९ ॥ इतिश्रीमद्रुद्रयामलेशिवपार्वती
संवादेब्रह्मप्रोक्तंश्रीगायत्र्यामंत्रवर्णात्मकंदिव्य
सहस्रनामस्तोत्रंसम्पूर्णम् ॥

॥ शुभंभूयात् ॥ मंगलमस्तु ॥

॥ अथ गायत्रीपटलप्रारंभः ॥

ॐअस्यश्रीब्रह्मशापविमोचनमंत्रस्य निग्रहानु

ग्रहकर्ताप्रजापतिर्ऋषिः ॥ कामदुघागायत्रीछं
दः ॥ ॐ ब्रह्मशापविमोचनीगायत्रीशक्तिर्दे
वता ब्रह्मशापविमोचनार्थेजपेविनियोगः ॥ स
वितुर्ब्रह्मोमेत्युपासनात्तद्ब्रह्माविदोविदुस्ताप्रयतं
तिधीराः ॥ सुमनसावाचाममाग्रतः ॥ ब्रह्मशापा
द्विमुक्ताभव ॥ ॐविश्वामित्रशापविमोचनमंत्र-
स्य नूतनसृष्टिकर्ता विश्वामित्रऋषिः ॥ वाग्दोहा
गायत्रीछंदः ॥ भुक्तिमुक्तिप्रदाविश्वामित्रानुगृ-
हीतागायत्रीशक्तिःसविता विश्वामित्रशापवि-
मोचनार्थेजपेविनियोगः ॥ तत्त्वानिचांगेष्वग्नि-

चितोधियांसः त्रिगर्भायदुद्भवांदेवाश्चोचिरेत्निश्व
सृष्टिं तांकल्याणीमिष्टकरींप्रपद्येयन्मुखान्निसृ-
तोवेदगर्भः ॥ ॐ गायत्रीत्वंविश्वामित्रशापाद्वि-
मुक्ताभव ॐ वसिष्ठशापविमोचनमंत्रस्यवसि
ष्ठऋषिः विश्वोद्भवोगायत्रीछंदः ॥ वसिष्ठानुगृ
हीतागायत्रीशक्तिर्दैवतावसिष्ठशापविमोचनार्थे
जपेविनियोगः ॥ तत्वानिचांगेष्वग्निचितोधि
यांसः ध्यायंतिविष्णोरायुधानिबिभ्रत् ॥ जना
नतासोपरमंचशश्वत् ॥ गायत्रीमासाच्छुरनुत्त
मंचधाम॥ ॐ गायत्रीवसिष्ठशापाद्विमुक्ताभव॥

सोहमर्कमहंज्योतिरर्कः ज्योतिरहंशिवः ॥ आ
त्मज्योतिरहंशुक्लकशुक्लकज्योतिरसोंहमों ॥ अ
होविष्णुमहेशेशोदिव्यासिद्धिसरस्वति ॥ अजरे
अमरेचैवदिव्ययोनिनमोस्तुते ॥ शुद्धंगायत्री
ध्यानं॥ यद्दैवैःसुरपूजितंपरतरंसामर्थ्यतारात्मि
कं पुन्नागाम्बुजपुष्पनागबकुलैः केशैः शुकैर-
र्चितं॥ नित्यंध्यानसमस्तदीप्तिकरणंकालाग्निरु
द्दीपनं तत्संहारकरंनमामिसततंपातालसंस्थं
मुखं॥ न्यासः॥ ॐ तत्पादांगुलीपर्वभ्यांनमः
॥ ॐसपादांगुलिभ्योनमः॥ ॐविजंघा० ॥ ॐतु

गा० जाँनुभ्यांनमः ॥ ॐवऊरुभ्यांनमः ॥ ॐरेशिश्ना प०
८० यनमः॥ ॐणिवृषणाभ्यांनमः ॥ॐयंकटचैनमः ९
॥ ॐभनाभ्यैनमः ॥ ॐगोउदरायनमः ॥ ॐदे
स्तनाभ्यांनमः ॥ ॐवउरसेनमः ॥ ॐस्यकंठा
यनमः ॥ ॐधीदंतेभ्योनमः ॥ ॐमतालुनेनमः
॥ ॐ हिनासिकायैनमः ॥ ॐ धिनेत्राभ्यांनमः
॥ ॐ योभ्रूभ्यांनमः ॥ ॐ योललाटायनमः ॥ ॐ
नःपूर्वमुखायनमः ॥ ॐ प्रदाक्षिणमुखायनमः ॥ ८०
ॐ चोपश्चिममुखायनमः ॥ ॐदउत्तरमुखायन
मः ॥ ॐ यातमूर्धेनमः ॥ ॐ इतिवर्णन्यासः ॥

ॐ तत्सवितुरंगुष्ठाभ्यांनमः ॥ ॐ वरेण्यं तर्ज्जनी
भ्यांनमः ॥ ॐ भर्गोदेवमध्यमाभ्यांनमः ॥
ॐ स्यधीमाहिअनामिकाभ्यांनमः ॥ॐ धियो
योनःकनिष्ठिकाभ्यांनमः ॥ ॐ प्रचोदयात्
करतलकरपृष्ठाभ्यांनमः ॥ अथदेहन्यासः ॥
ॐ भूः पादयोः ॥ ॐ भुवः जान्वोः ॥ ॐ
स्वः नाभौ ॥ ॐ महः हृदये ॥ ॐ जनःक
ण्ठे ॥ ॐ तपः ललाटे ॥ ॐ सत्यंमूर्ध्नि ॥ ॐ
तत्पादयोः ॥ ॐ सवितुर्जान्वोः ॥ ॐ वरेण्यंस्कं
धयोः ॥ ॐ भर्गोहृदये ॥ ॐ देवस्यकंठे ॥ ॐ धी

गा० महिवक्त्रे ॥ ॐ धियोयोनेत्रे ॥ ॐनःमुखे ॥ ॐ प०
८१ प्रचोदयात् अस्त्रायफट् ॥ ॐआपःअंगुष्ठाभ्यां ९
नमः ॥ ॐज्योतिस्तर्जनीभ्यांनमः ॥ ॐरसो
मध्यमाभ्यांनमः ॥ ॐअमृतं अनामिकाभ्यांन
मः ॥ ॐब्रह्मकनिष्ठिकाभ्यांनमः ॥ ॐ भूर्भुवः
स्वरों करतलकरपृष्ठाभ्यांनमः ॥ ॐ अग्नयेहृ
दयायनमः॥ॐ वायवेशिरसेस्वाहा ॥ ॐ सूर्याय
शिखायैवषट् ॐ ब्रह्मणेकवचायहुम् ॥ ॐ विष्ण ८१
वेनेत्रत्रयायवौषट् ॥ ॐ रुद्रायअस्त्रायफट् ॥ इ
तिन्यासः ॥ अथवेदादिगीतायाःप्रसादजननंवि

धिम् ॥ गायत्र्याः संप्रवक्ष्यामि धर्मार्थकाममो
क्षदम् ॥ १ ॥ नित्यनैमित्तिके काम्ये तृतीये तप
वर्द्धने ॥ गायत्र्यास्तु परं नास्ति इह लोके परत्र च ॥
॥ २ ॥ मध्याह्ने मितभुग्मौनी त्रिस्थानार्चनतत्परः
॥ जपेल्लक्षत्रयं धीमान्नान्यमानसकस्तु यः ॥ ३ ॥
॥ कर्माभियोंजपेत्पश्चात्क्रमशः स्वेच्छया पि वा ॥
यावत्कार्यं न कुर्वीत न लोपेत्तावता व्रतम् ॥ ४ ॥
आदित्यस्योदये स्नात्वा सहस्रं प्रत्यहं जपेत् ॥ आ
युरारोग्यमैश्वर्यं धनं च लभते ध्रुवम् ॥ ५ ॥ त्रिरा
त्रोपोषितः सम्यग्घृतं हुत्वा सहस्रशः ॥ सहस्रंल

भमाप्नोतिहुत्वाग्नौखादिरैंधनम् ॥ ६ ॥ पलाशैः प०
समिधैश्चैवघृताक्तानांहुताशने ॥ सहस्रंलाभमा ९
प्नोतिराहुसूर्यसमागमे ॥ ७ ॥ हुत्वातुखादिरंवह्नौ
घृताक्तंरक्तचंदनम् ॥ सहस्रहेममाप्नोतिराहुचंद्र
समागमे ॥ ८ ॥ रक्तचंदनमिश्रंतुसघृतंहव्यवा
हने ॥ हुत्वागोमयमाप्नोतिसहस्रंगोमयंद्विजः ॥
॥ ९ ॥ जातीचंपकराजार्ककुसुमानांसहस्रशः ॥
हुत्वावस्त्रमवाप्नोतिघृताक्तानांहुताशने ॥ १० ॥ ८२
सूर्यमंडलबिम्बेचहुत्वातोयंसहस्रशः ॥ सहस्रंप्रा
प्नुयाद्धेमरौप्यमिंदुमयेहुते ॥ ११ ॥ अलक्ष्मी

पापसंयुक्तेमलव्याधिविनाशके ॥ मुच्येतसहस्र
जाप्येनस्नायाद्यस्तुजलेनवै ॥ १२ ॥ गोघृतेन
सहस्रेणलोध्रेणजुहुयाद्यदि ॥ चौराग्निमारुतोत्था
निभव्यानिनभवंतिवै ॥ १३ ॥ क्षीराहारोजपेल्लक्ष-
मपमृत्युमपोहति ॥ घृताशीप्राप्नुयान्मेधांबहुवि-
ज्ञानसंचयाम् ॥ १४ ॥ हुत्वावेतसपत्राणिघृताक्ता
निहुताशने ॥ लक्षाधिपस्यपदवींसार्वभौमंनसं-
शयः ॥ १५ ॥ लक्षेणभस्महोमस्यहुत्वाह्युत्तिष्ठते
जलात् ॥ आदित्याभिमुखांस्थित्वानाभिमात्रज-
लेशुचौ ॥ १६ ॥ गर्भपातादिप्रदराश्चान्येस्त्रीणांम-

गा० हारुजः ॥ नाशमेष्यंतितेसर्वेमृतवत्सादिदुःखदाः प०
८३ ॥ १७॥ तिलानांलक्षहोमेनघृताक्तानांहुताशने ॥ १
सर्वकामसमृद्धात्मापरंस्थानमवाप्नुयात् ॥ १८ ॥
यवानांलक्षहोमेनघृताक्तानांहुताशने ॥ सर्वका
मसमृद्धात्मापरांसिद्धिमवाप्नुयात् ॥ १९ ॥ घृ
तस्याहुतिलक्षेणसर्वान्कामानवाप्नुयात् ॥ पंच
गव्याशनोलक्षंजपेज्जातिस्मृतिर्भवेत् ॥ २० ॥ त
देवह्यनलेहुत्वाप्राप्नोतिबहुसाधनम् ॥ अन्नादिह ८३
वनान्नित्यमन्नाद्यंचभवेत्सदा ॥ २१ ॥ जुहुया
त्सर्वसाध्यानामाहुत्यायुतसंख्यया ॥ रक्तसि

द्धार्थकान्हुत्वासर्वान्साधयतेरिपून् ॥ २२ ॥
लवणंमधुसंयुक्तंहुत्वासर्ववशीभवेत् ॥ हुत्वातुक
रवीराणिरक्तानिज्वालयेज्ज्वलं ॥ २३ ॥ हुत्वा
भीलातकंतैलंदेशादेवप्रचालयेत् ॥ हुत्वातुनिम्ब
पत्राणिविद्वेषशांतयेनृणां ॥ २४ ॥ रक्तानांतंदु
लानांचघृताक्तानांहुताशने ॥ हुत्वाबलमवाप्नो
तिशत्रुभिर्नसजीयते ॥ २५ ॥ प्रत्यानयनसिद्ध्य
र्थंमधुसर्पिःसमन्वितम् ॥ गवांक्षीरंप्रदीप्तेग्नौजु
हतस्तत्प्रशाम्यति ॥ २६ ॥ ब्रह्मचारीजिताहा
रोयःसहस्रत्रयंजपेत् ॥ संवत्सरेणलभतेधनैश्व

गा० र्थंनसंशयः ॥ २७ ॥ शमीबिल्वपलाशानामर्कै १०
८४ स्यतुविशेषतः ॥ पुष्पाणांसमिधश्चैवहुत्वाहेमम ९
वाप्नुयात् ॥ २८ ॥ आब्रह्मऽयंबकादीनांयस्याय
तनमाश्रितः ॥ जपेल्लक्षंनिराहारःसतस्यवरदो
भवेत् ॥ २९ ॥ बिल्वानांलक्षहोमेनघृताक्तानां
हुताशने ॥ परांश्रियमवाप्नोतियदिनभ्रूणहाभ
वेत् ॥ ३० ॥ पद्मानांलक्षहोमेनघृताक्तानांहुता
शने ॥ प्राप्नोतिराज्यमखिलंसुसंपन्नमकंटकम् ८४
॥ ३१ ॥ पंचविंशतिलक्षेणदधिक्षीरंहुताशने ॥
स्वदेहेसिद्धयतेजंतुःकौशिकस्यमतंतथा ॥३२॥

एकाहंपंचगव्याशीएकाहंमारुताशनः ॥ एका
हंचद्विजोन्नाशीगायत्रीजपउच्यते ॥ ३३ ॥ म
हारोगाविनश्यंतिलक्षजप्यानुभावतः ॥ ३४ ॥
शतेनगायत्र्याःस्नात्वाशतमंतर्जलेजपेत् ॥ श
तेनयस्त्वपःपीत्वासर्वपापैःप्रमुच्यते ॥ ३५ ॥ गो
घ्नःपितृघ्नमातृघ्नौब्रह्महागुरुतल्पगः ॥ स्वर्णहारी
तैलहारीयस्तुविप्रःसुरांपिबेत् ॥ ३६ ॥ चंदन
द्वयसंयुक्तंकर्पूरंतंडुलंयवम् ॥ लवंगंसुफलंचा
ज्यंसिताचाम्रस्यदारुकैः ॥ ३७ ॥ अयंन्यूनविधिः
प्रोक्तोगायत्र्याःप्रीतिकारकः ॥ एवंकृतेमहासौ

स्वयंप्राप्नोतिसाधकोध्रुवं ॥ ३८॥ अन्नाज्यभोज
नंहुत्वाकृत्वावाकर्मगर्हितं ॥ नसीदेत्प्रतिगृह्णा
नोमहीमपिससागराम्॥ ३९॥ येचास्यउत्थिता
लोकेग्रहाः सूर्यादयोभुवि ॥ तेयांतिसौम्यतां
सर्वेशिवेइतिनसंशयः ॥ ४० ॥

॥ इति गायत्रीपटलं समाप्तम् ॥

॥ गायत्रीपंचांगं समाप्तम् ॥

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मज गंगावि-
ष्णुना स्वकीये लक्ष्मीवेंकटेश्वरमुद्रणालयेऽङ्कितम् ।
(द्वितीया वृत्तिः)—संवत् १९५२ शके १८१७

॥ श्रीः ॥

ब्राह्मण्यमूलापि च क्षत्रवैश्यानां धर्मपालनहेतुभूतेयं गायत्री तस्याः पूजापाठादि सर्वेषामपेक्षतेऽतोस्माकमासीन्मनीषैतन्मुद्रणे। एतस्मिन्नेव काले संवत् १८२३ तमे लिखितं गायत्रीपञ्चांगपुस्तकं यत्नेन संगृहीतमयोध्यामण्डलांतर्गतरायबरेलीप्रान्तस्थदौलतपुरनिवासिमहावीरप्रसादद्विवेदि (हेड टेलिग्राफ इन्स्पेक्टर आय० एम्० रेलवे झांसी तथा विहारवाटिका विनयविनोद स्नेहमाला व ऋतु तरंगिणीके कर्ता) एत्येतैः प्रेषितम्। तथा च द्वितीयं प्राचीनं पुस्तकं अर्गलपुरनिवासि पण्डितचिरंजीलालबृजलाल इत्येतैः प्रेषितम्। अत उक्तपण्डितद्वयस्य बहूपकारभारं शिरसा धारयामि। तथाच अस्मत्समीपमपि कानिचिदासन् पुस्तकानि। इतीमानि संमेल्य रावेरग्रामनिवासिपरशुरामभट्टतनयगोविंदशास्त्रिभिः संशोध्य मुद्रितम्। तदेतत्पुनर्द्वितीयवारं मुद्रितम्। एतत्पुनर्मुद्रणाद्यधिकारः १८६७ खिस्ताब्दिक २५ तम नियमानुसारेण मया स्वाधीनं रक्षितः।

श्रीकृष्णदासात्मज–गंगाविष्णुः

"लक्ष्मीवेंकटेश्वर" छापाखाना, कल्याण–मुंबई.

जाहि-

रात.

शाक्तप्रमोद अर्थात् दशमहाविद्याका पंचांग।

सम्पूर्णभारत निवासी द्विजोत्तमों को विदित हो कि, यह अलभ्य क्लिष्टता-से प्राप्त, परमगुप्त, अत्युत्तम नवीन ग्रन्थ हमारे यहां छपा है। इसमें आदि शक्ति जगन्माताके दशों स्वरूप अर्थात् काली, तारा, त्रिपुरसुंदरी, भुवने-श्वरी, छिन्नमस्ता, त्रिपुरभैरवी, धूमावती, बगलामुखी, मातंगी, कमलात्मि-का, तथा पञ्च देवता—दुर्गा शिव, गणेश, सूर्य, विष्णु, और वेदोक्त, शास्त्रोक्त, मंत्रोक्त, तंत्रोक्त विस्तारपूर्वक लिखा है तथा जिनके चित्र (तस्वीरें) भी फोटोग्राफानुसार यथावत् खींची गई हैं इस ग्रंथका मूल्य ५ रुपया.

श्रीमद्गोविन्दराजीय'भूषण' 'तनिश्लोकी' 'रामानुजी' (संस्कृत) टीकाओंसे विभूषित श्रीमद्वाल्मीकीयरामायण।

जगद्वन्दन, दशरथनन्दन, श्रीरामचन्द्र महाराज के विमल यश का यह

अम्लान मानस श्रीरामभक्तों और विद्यारसिक महानुभावों के मज्जनार्थ इस यंत्रालय से प्रगट हुआ है करुणावरुणालय, दयापारङ्गत, विश्वव्यापी, परम प्रभु श्रीराम का यह अतुल यश किस को प्रेममग्न नहीं करता? इस ग्रंथमें श्रीरामानुजमतानुयायी गोविन्दाचार्य स्वामी के पूर्णपांडित्य, लेखक्षमता, कल्पनाकानन और विद्वन्मनोरंजक शक्ति की प्रतिभास्वरूप व्याख्या बहुत विस्तार से की गई है कि जो एक सांप्रदायिक महानुभाव के द्वारा होने पर भी, स्मार्तादि किसी मत के विरुद्ध नहीं. वरु, सारे मतों को परम मान्य हो अपनी अलौकिक छटा के कारण गंभीराशय विद्यावीरों से विशेष आदरणीय है. नमूना देखने की इच्छा हो तो पत्र भेजनेसे बिनादाम भेजा जायगा. इस सर्वांगसुन्दर, बृहत, प्रामाणिक ग्रंथ का मूल्य केवल २५ रु० नियत किया गया है. महसूल ३ रु० '**निरुक्ति**' '**निर्वचन**' '**भगवद्गुणदर्पणाख्य भाष्य**' तीन व्याख्याओं से विभूषित नीचे लिखा हुआ "**श्रीविष्णुसहस्रनाम (बारह हजार) ग्रंथ**" कमीशनमें दिया जायगा.

जाहि-

श्रीविष्णुसहस्रनाम-भगवद्गुणदर्पणभाष्य निर्वचन और निरुक्ति इन तीन संस्कृत टीकासहित छपके तैयार है, यह पुस्तक बहुत बडा है, की० ५ रु० । २ भगवद्गुणदर्पणभाष्यकी व्युत्पत्ति और उसके अनुसार दीपिका नामक भाषाटीका सहित, कीमत १ रु० । ३ शंकराचार्यकृत भाष्यकी व्युत्पत्ति और उसके अनुसार चंद्रिका नामकभाषाटीका सहित कीमत १२ आना । केवल भाषाटीकासहित गुटका, की० ८ आ० ।

गीता पंचरत्न (गुटका) भाषाटीकासहित. (पांचों रत्नोंकी सरल सुबोध भाषाटीका छपके तैयार है.) की० २ रु० ।

स्वरतालसमूह (सितारका पुस्तक.)

इसमें स्वर. श्रुति, मूर्छना व राग, रागिणी, पुत्र, भार्या, लयादिका वर्णन व ठेका, पखवाजकी परने व सितारकी गतें व तोडे फिरोजखानी मशीतखानी बाजकी व बोल, तराना, चतुरङ्ग, सर्गम सब रागोंमें और नये २ तालोंमें बनाकर लिखी हैं. और अलाप जोडभी लिखा है कि,

रात.

जिसके द्वारा सीखनेवालेको सब सितारकी गतोंका रागरागिणीका और तालोंका ज्ञान पूरा पूरा हो जावेगा. ऐसा गानविद्याका विस्तारसहित अत्युत्तम पुस्तक कहींभी आजतक छपा नहीं है. सबके सुभीतेके लिये कीमतभी अल्प रक्खी है. १॥ रु० ।

अभिलाखसागर.

यह ग्रन्थ भाषामें अभिलाखदास स्वामीजीने बनाया है इसमें तरंग ग्यारह हैं, और प्रत्येक तरंगमें दो चार आठ कई लहरियांभी हैं. गुरुशिष्य-संवादसे ब्रह्म किसको कहते हैं यह इसमें व्यवहार रीतिसे प्रतिपादित है। एक शिष्यने बहुत गुरुओंके पास जा ब्रह्मका प्रश्न किया है। और सब गुरुओंने भिन्न २ मतोंसे ब्रह्म बताया है. इन सब मतोंका खंडनकर अंतमें ब्रह्मकी सिद्धि की है। इसमें एकबार थोडा भाग देखनेसे सब ग्रंथ पढनेकी उत्कंठा हो जाती है, और पुनः पुनः पढनेसेभी तृप्ति नहीं होती, यह चमत्कार है. की० २ रु० ।

जाहि- रात.

षट्पंचाशिका भाषाटीकासहित, यह भाषाटीका बहुत विशाल सुबोध लिखी गई है; इसमें जिस जिस विषयकी अपेक्षा होतीहै तिन सब विषयोंका और ग्रंथोंसे समावेश कियाहै और स्पष्टताके लिये कोष्टकें तथा अन्य आचार्योंका मत आदि सब प्रकार टिप्पणीरूपसे लगा दिये हैं, आजतक ऐसी कहांभी नहीं छपी है । यह टीकाछपके तैयार है । कि० ६ आना ।

पुस्तक मिलनेका ठिकाना-

गंगाविष्णु श्रीकृष्णदास,


"लक्ष्मीवेङ्कटेश्वर" छापाखाना,

कल्याण-मुंबई.

[illegible]

[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]

इति गायत्रीपञ्चाङ्गं समाप्तः ।



अथ गायत्रीचक्रम्.

अक्षर	ऋषि	छन्द	देव[illegible]	वर्ण	तत्व	शक्ति	मुद्रा	कला		पापहरफलम्	तकारा[illegible] पादादौ
त	वसिष्ठ	गायत्री	अ[illegible]	पीतं	पृथ्वी	ब्राह्मी	सम्मुखं	पनी	आयुष्यम्	अज्ञानदोषहरम्	ॐ तकारं पादांगुष्ठयोः
त्स	भरद्वाज	उष्णिक्	वा[illegible]	श्यामं	अप्	गौरी	सम्पुटम्	कला	आरोग्यम्	उपपातकहरम्	ॐ त्सकारं गुल्फयोः
वि	गौतमः	अनुष्टुप्	सू[illegible]	श्वेतं	तेज	प्रभा	विततं	[illegible]श्वा	ऐश्वर्यदम्	महापातकहरम्	ॐ विकारं जंघयोः
तु	विश्वा[illegible]	[illegible]हती	वि[illegible]	नील	वायु	नित्या	विस्तीर्णं	[illegible]	धनदम्	दुष्टग्रहदोषहरम्	ॐ तु[illegible]
र्व	भृगुः	पङ्क्तिः	यमः	वन्हिः	आकाशं	विश्वा	एकमुखं	वरद	कामदम्	भ्रूणहत्यादोषहरं	ॐ वंकारं ऊर्वोः
रे	शांडिल्य	त्रिष्टुप्	वरुणः	अतिशुभ्रं	गंधः	भद्रा	द्विमुखं	रेवती	विद्यादम्	अगम्यागमनहरम्	ॐ रेकारं गुदे
णि	लोहितः	व्यक्तिः	बृहस्पतिः	हरितम्	रसः	विलासिनी	त्रिमुखम्	सूक्ष्म	कामदम्	अभक्षाभक्षहरम्	ॐ णिकारं लिंगे
यं	गर्गः	कान्तिः	पर्जन्यः	अतिपीतं	रूपं	विश्वा	चतुर्मुखं	ज्ञान	धनदम्	पुरुषहत्यार	ॐ यंकारं कट्यां
भ	शातातपः	बृहती	इन्द्रः	ताम्रं	स्पर्शः	काली	पंचमुखं	भर्गा	सन्ततिदम्	गोहत्यारन्	ॐ भकारं नाभौ
र्गो	सनत्कुमारः	सत्या	गन्धर्वः	रक्तम्	शब्दः	जया	षण्मुखम्	गोमती	अभीष्टदम्	स्त्रीहत्यारम्	ॐ र्गोकारं उदरे
दे	शुनःशेपः	पङ्क्तिः	त्वष्टा	श्यामः	वाक्	कान्ता	अधोमुखं	दविका	इष्टकन्यादम्	एनसदोषहरम्	ॐ देकारं स्तनयोः
व	भार्गवः	विराट्	मैत्रावरुणिः	पीतम्	पाणिः	शान्ता	शकटम्	वरा	कान्तिदम्	फयरादोषहरम्	ॐ वकारं हृदये
स्य	पाराशरः	विश्वाट्	पौष्णः	विद्युत्	चरणः	दुर्गा	यमपाशं	सिद्धा	चिन्तितसिद्धिदं	पितृभ्रातृदोषहरं	ॐ स्यकारं कण्ठे
धी	पुण्डरीकः	विस्तारपंक्ति	सुरेशः	शुभ्रम्	उपस्थ	सरस्वती	ग्रथितम्	धोना	कीर्तिदायकम्	पूर्वनीत पापहरं	ॐ धीकारं मुखे
म	कुत्सः	कात्यायनी	मरुत्	रक्तः	वायुः	विद्युद्वर्णा	उन्मुखोन्मुखं	मर्यादा	सौभाग्यदम्	सर्वपापहरम्	ॐ मकारं तालुदेशे
हि	दक्षः	पङ्क्तिः	सौम्यः	नीलम्	श्रोत्रम्	विशाला	प्रलंबं	स्फुटा	अभीष्टसिद्धिदं	प्रतिग्रहदोषहरं	ॐ हिकारं नासाग्रे
धि	कश्यपः	त्रिष्टुप्	अंगिराः	रक्त	त्वचा	विभूति	मुष्टिकं	बुद्धि	त्रैलोक्यमोहनदं	प्रायश्चक्षेपहरम्	ॐ धिकारं नेत्रयोः
यो	जमदग्निः	जगती	विश्वेदेवाः	रुक्मसदृशं	चक्षुः	कमलाः	मत्स्यः	योगमा[illegible]	परात्रयपदम्	मनःसर्वपापहरं	ॐ योकारं भ्रुवोर्मध्ये
यो	आत्रेयः	महाजगती	अश्विनौ	उद्युत्सूर्य निभः	जिह्वा	कला	कूर्मः	योगांत[illegible]	देवप्रतिग्रहदो०	इन्द्रपदप्राप्तिः	ॐ योकारं ललाटे
नः	विष्णुः	महिष्मती	प्रजापतिः	श्वेतम्	नासिका	पाप्मा	वराहका	पृथ्वी	त्रैलोक्यदम्	विष्णुप्राप्तिः	ॐ नःकारं पूर्वमुखे
प्र	अंगिराः	नृमती	कुबेरः	रोचनाभ	मनः	अचला	सिंहाक्रा[illegible]	प[illegible]	[illegible]शत्रुहक्षयं	रुद्रपदप्राप्तिः	ॐ प्रकारं दक्षिणमुखे
चो	कुमारः	भू छंदः	शंकरः	चंद्रसदृशं	अहंकारः	परा	महाक्रा[illegible]	ते[illegible]	[illegible]नरोतिशायदं	ब्रह्मपदप्राप्तिः	ॐ चोकारं पश्चिममुखे
द	मृगशृंगः	भुवः	ब्रह्म	पीतः	बुद्धिः	भृशीला	मुद्गरम्	स[illegible]	[illegible]र्गप्रदम्	सायुज्यपदप्रा०	ॐ दकारं उत्तरमुखे
यात	भगः		विष्णुः	शुभ्रवर्णः	गुदा	वज्रहृया	पल्लवं	स[illegible]	[illegible]लोकप्रदम्	सर्वव्यापि	ॐ यकारं मूर्ध्नि

अथ श्लोकाः

प्रणवंपूर्वमुद्धृत्यव्याहृत्यासप्तभिस्तथा
॥ चतुर्विंशतिगायत्र्याद्विरावृत्योपवीत
कम् ॥१॥ ब्रह्मणोत्पादितंसूत्रं विष्णु
नात्रिगुणीकृतम् ॥ रुद्रेणदीयतेग्रथी
सावित्री चाभिमंत्रितम् ॥ २॥ [illegible]
[illegible]नप्रवक्ष्यामियदुक्तंग्रंथकोटिषु
परोपकारःपुण्यायपापायपरपीड[illegible]
॥ ३ ॥ तयादचोप्रनः योयोधिहिम
स्यवदेगोभियणीर्वतुवित्सत ॥ शिव
शिवःशिवोजीवः नजीवःकेवलःशिवः
पशुपाशस्थितोजीवः पाशमुक्तःसदा
शिवः ॥ ४॥ वसिष्ठशापमोचनंहुंफट्
स्वाहाउपसंहारमुद्राप्रदर्शनम् ॥ प्र
णवोभूर्भुवस्वश्चपुनःप्रणवसंयुताम् ॥
अन्त्योंकारसमायुक्तामन्यतेमनयोःपरा
म् ॥ ५॥ तदाद्यंचतदाद्यंच कुर्यात्प्रण-
वसंयुतम् ॥ अद्यांतरिक्षतांकुर्यादि-
तिपाराशरोब्रवीदिति ॥ येनचांडंतिसं
तानंमोक्षमिच्छंतिकेवलम् ॥६॥ प्र
त्योंकारसमौकुर्वन्नक्षरंमोक्षमाप्नुयात् ७
गृहेजपंसमंविद्याद्गोष्ठेशतगुणंभवेत् न
द्याशतसहस्रंस्यादनंतंशिवसन्निधौ ८
अग्रेपृष्ठेतथावामेसमीपेगर्भमंदिरे [illegible]
प्रदक्षिणंहोमंनकुर्यान्निशिवालये ॥९॥
शिवमध्येजपंकुर्यादिन्यथातीर्थंभिष्णदः य
जमानजापकश्चैवषण्मासंचनजीवतीति १०
तकारं सर्वव्यापि.

May

June

July

August

September

October

November